रूपकमञ्जरीग्रन्थमाला—२

वाल्मीकि-संवर्द्धनम्

पश्चिमवङ्ग-शिक्षाधिकार-सेवातो विश्रान्तेन प्राध्यापकेन
श्रीविश्वेश्वर विद्याभूषण-काव्यतीर्थेन
विरचितम्

खिन्नात्मा बहुपापकर्म्मकलुषै रत्नाकरो ब्राह्मणो
ब्राह्मण्याच्च्युतधर्म्मको मधुमयं रामेति गायन्मुदा ।
प्रेम्णा नेत्रजलैर्विधौतहृदयो ब्रह्मोपदिष्टश्चिरं
लेभे शाश्वतकीर्त्तिमाल्यममलं रामायणोद्गायनैः ॥

VĀLMĪKI–SAMVARDHANAM

(Sanskrit Drama)

By
PAṆDIT VISVESVAR VIDYĀBHŪṢAṆ, KĀVYATĪRTHA

CALCUTTA
1967

रूपकमञ्जरीग्रन्थमाला—२

वाल्मीकि-संवर्द्धनम्

पश्चिमवङ्ग-शिक्षाधिकार-सेवातो विश्रान्तेन प्राध्यापकेन
श्रीविश्वेश्वर विद्याभूषण-काव्यतीर्थेन
विरचितम्

खिन्नात्मा वहुपापकर्म्मकलुषै रत्नाकरो ब्राह्मणो
ब्राह्मण्याच्च्युतधर्म्मको मधुमयं रामेति गायन्मुदा ।
प्रेम्णा नेत्रजलैर्विधौतहृदयो ब्रह्मोपदिष्टश्चिरं
लेभे शाश्वतकीर्त्तिमाल्यममलं रामायणोद्गायनैः ॥

VĀLMĪKI–SAMVARDHANAM

[Sanskrit Drama]

By
PANDIT VISVESVAR VIDYABHUSAN, KĀVYATĪRTHA

CALCUTTA
1966

कलिकाता-रवीन्द्रभारती-विश्वविद्यालयाध्यापक-श्रीध्यानेशनारायण-चक्रवर्ति
एम्. ए. साहित्यशास्त्रिणा प्रकाशितम् ।

प्राप्तिस्थानम्
(१) "ऋषि-धाम"
पोः आः दत्तपुकुर, जिः २४ परगणा,
पश्चिमवङ्ग ।
(२) संस्कृत पुस्तकभाण्डार
३८, विधान सरणि
कलिकाता-६

To be had of
(1) "RISHI-DHAM"
P.o. Duttapukur,
Dt. 24 Paraganas, West Bengal.
(2) Sanskrit Pustak Bhandar
38 Bidhan Sarani
Calcutta-6

मूल्यम्—रूप्यकत्रयम्
Price—Rupees Three only

All rights reserved
सर्वस्वत्वं संरक्षितम्

Published by
Prof. Dhyanesh Narayan Chakravarti, Sāhitya-Śāstrī, M.A.
(Rabindra Bharati University, 6/4 Dwaraka Nath
Tagore Lane, Calcutta-6)

"RISHI-DHAM"
Po.—Duttapukur, Dt.—24 Parganas, West Bengal.

Printed at the Calcutta Oriental Press Private Ltd.
9, Panchanan Ghosh Lane, Calcutta-9.

समर्पणम्

यत्स्नेहामृतसिक्त-पुण्यतपसाहमभिषिक्तो निरन्तर-चरणोपान्तोपविष्टः शास्त्रशिक्षां प्रापितः, यत्पुण्यकण्ठविगलिताऽपूर्व्वा व्याख्यानामृतधारा सह-सतीर्थ-निकरं मामपावयत्, न्यमज्जयच्चानन्द-सुधासिन्धौ वहुवर्षाणि, मम सारस्वत-साधनं यस्यानन्तकरुणाशिषां प्रसादफलम्, निरन्तरप्रवाहा च यद्-विरचित-कवितामधुनिर्झरिणी स्यन्दमाना सुधियां ज्ञानार्थिनाञ्च मनांसि समरञ्जयत्, समनुप्राणयच्च मां सारस्वतसाधनाय,—

कुलपतिकल्पस्य ज्ञानतपस्विनो विदेहस्य तस्य परमगुरोराचार्य-वर्य-ज्येष्ठतातपादस्य, चट्टल-संस्कृतमहाविद्यालयाध्यक्ष-महामहाध्यापक-**रजनीकान्त साहित्याचार्य्य**-स्यामरचरण-कमलयोर्निवेदयामि ग्रन्थमिम-मर्घ्यरूपेण तदीयाकृतिर्दीनशिष्यश्चिरप्रणतः

श्रीविश्वेश्वर विद्याभूषण-काव्यतीर्थ-देवशर्म्मेति ।

सारस्वतसाधना—स्वरचितग्रन्थार्घ्यसम्भारः

रूपकमञ्जरी नाटकगुच्छम् :—

दस्युरत्नाकरम्	नाटकम्
भरतमेलनम्	”
वाल्मीकिसंवर्द्धनम्	”
चाणक्यविजयम्	”
प्रबुद्धहिमाचलम्	”
विष्णुमाया	”
राजर्षिभरतम्	”
उमातपस्विनी	”
द्वारावती	”
ओङ्कारनाथमङ्गलम्	”
मातृपूजनम्	”
उत्तर-कुरुक्षेत्रम्	”
राजर्षिसुरथम्	”
काशीकोशलेशम्	”
काव्यकुसुमाञ्जलिः	संस्कृत-खण्डकाव्यम्
गङ्गा-सुरतरङ्गिणी	संस्कृत-खण्डकाव्यम्
वनवेणुः	संस्कृत-गीतिकाव्यम्
मणिमालिका	संस्कृत-कथासाहित्यम्
मानसी	वङ्गभाषानिवद्ध-प्रवन्धावली
पद्मपुट	पद्यमयं वङ्गभाषानिवद्ध-खण्डकाव्यम्
पुष्पराग	वङ्गभाषानिवद्ध-कवितावली

प्राक्कथनम्

संस्कृतसाहित्यम्—

"अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगत-परिमलाऽपि हरति दृशं मालतीमाला ॥"

इयं महाजनोक्तिः संस्कृत-साहित्य-प्रसङ्गेषु पूर्णां सार्थकतामावहति । यत एतादृशगुणसम्पन्ना हि मधुमयी देवभाषा । अतलस्पर्शः खलु रसमयो विशालः संस्कृत-साहित्य-सागरः । स हि अनन्तरत्नसम्भारैरलंकृतो विश्व-जनानां चेतांसि विनोदयति, सम्भावयति च सुचिरं नवनवपीयूषमयीं रचना-वलीं रसिकानां प्रमोदाय मनीषिणां चानन्दवर्धनाय । तस्यां सुधामन्दाकिन्या-मभिस्नातं जगत् परितृप्यति, प्रशाम्यन्ति तापदग्धानि हृदयानि, कृतार्था भवन्ति च ज्ञानार्थिनः ।

देवभाषाया वैशिष्ट्यम्—छन्दोमालिनी गद्यपद्यमयी देवभाषा चिरन्तन-माधुर्यगुणेन स्वमहिम्ना विराजते । ऊर्द्ध्वेऽमृतमस्या मूलम् ; दिव्यलोकात् प्रसरन्तीयं वसुधातले समन्तात् सुधीभिः परिसेव्यमाना विचित्ररसोज्ज्वल-कमनीय-सुषमासम्भारेण शोभते, अनुरञ्जयति च विदग्धमानसमानन्दामृत-परिवेषणेन । इयं हि विश्वभाषाणां जननी, सञ्जीवनी च तृषितजनचित्तानाम् । प्राकाम्येण कवितामालिनी सुललित-ज्ञानगर्भ-सन्दर्भ-समलंकृता च काऽन्या द्वितीया भाषा जगति वर्तते, या हि श्रुतिमूला सुनिर्मलाध्यात्मतत्त्व-ब्रह्मविद्या-ज्ञानविज्ञान-नीति-व्यवहार-दर्शनशास्त्राणां प्रचारेण तथा ज्योतिषायुर्वेदचतुःषष्ठि-कलाविद्या-काव्येतिहासपुराण-ललितकथाख्यायिकानां विन्यासेन च निखिलचित्तमा-नन्दयति ? इयमेकाऽप्रमेया चासृष्टेः शश्वत्कालं स्वकीयमाहात्म्येन विराजमाना समापद्यते रत्नसिंहासनं विश्वसाहित्यसभायां राजराजेश्वरीगौरवेण ।

संस्कृतभाषाया ऐश्वर्यं संहतिसाधकत्वं च—संस्कृतभाषा खलु सृष्टिरादेव धातुर्ब्रह्ममयी वाङ्मूर्त्तिः परमेश्वरस्य। वैदिकयुगादारभ्येयमात्मनोऽपार्थिवगुणमाहात्म्येन तथा मृत्युञ्जयशक्तिप्रभावेण च सारस्वतानां नवनवानुपमरचनासम्भारेण विमण्डिता सगौरवं विजयते। अविरामस्तस्या अमृतमयः प्रवाहः ; अन्तहीनश्च तद्विगलितो मधुनिर्झरः। आ हिमाचलात् कन्याकुमारिकोपान्तवर्तिनि विशाले भारतवर्षे—किं गहनोत्तुंग-तुषारशैलाधिष्ठितामरनाथ-पशुपतिनाथतीर्थेषु अथवा भूस्वर्ग-काश्मीरप्रदेशान्तर्गतमनोरमशोभाविमण्डिते क्षीरभवानी-मन्दिरे, किंवा कन्याकुमारी-रामेश्वरादितो मद्राज-गोदावरी-नर्मदा-विन्ध्यतट-समाश्रितेषु तीर्थेषूज्जयिनी-मालव-गुर्जरमहाराष्ट्रादिप्रदेशवर्त्तिमन्दिरेषु,—किंवा वाडवानल-सहस्रधारा-शम्भुनाथचन्द्रशेखरधामतो दक्षिणसागरतरङ्ग-परिमण्डित-चट्टलादिनाथतीर्थेषु तथा कैलासमानससरोवरादिकमारभ्य कामाख्या-केदार-वदरी-हरिद्वार-वाराणसीप्रयागश्रीक्षेत्र-वृन्दावन-प्रभास-द्वारका-गंगासागरादितीर्थमन्दिरेषु च न किं भक्त-विप्रकण्ठोदीरितसंस्कृतस्तोत्रमन्त्रावली श्रुतिपथेषु कलसंगीतवदमृतायमाना समनुप्राणयति नानादिग्देशागतनरनारीणां चित्तानि अपूर्वाध्यात्मगतभावैक्येन ? इयं हि मन्त्रात्मिका मन्त्रमालिनी मधुस्रवा सुरभाषा याऽखिल-नरनारीनिवहान् प्रमोदयति, समुल्लासयति च तान् नितरामपूर्वसत्त्वभावोद्भवपुण्यानन्दसन्दोहेन। एवं हि विशालं भारतवर्षं संस्कृतभारतीप्रसादेन संवद्धमपूर्वमाध्यात्मिकमैक्यं धारयति।

संस्कृतमूला भारतसंस्कृतिः—संस्कृतमूला खलु सुमहती पावनी भारतसंस्कृतिः। विचित्रेयं सुमंगला च विदधाति सुसंहतिं भारतीयानाम्। सन्ध्या-वन्दन-श्राद्ध-तर्पण-देवार्चनासु तथा विवाहादि-मांगलिकानुष्ठानेषु च संस्कृतमन्त्राणामपरिहार्यत्वं प्रयोगसिद्धम्। अगाधे संस्कृतसाहित्य-सुधाम्बुधौ पुण्याभिषिक्तः को जनो न तृप्यति ? अतः संस्कृतानुशीलनं भारतवर्षे धर्ममूलं ज्ञानसाधनार्थमपरिहरणीयञ्च। तेन संस्कृतानुशीलन-विरहितं भारतवर्षं न कथमपि चिन्तनीयम् ; न वा कदापि वयं सुरभारती-समर्चन-विरतास्तत्त्वतो जीवामः।

संस्कृतभाषाप्रयोगः—आसीदेकः कालो यदा भारतीयधर्माचार्या ऋषयः साधकास्तपस्विनश्च देवभाषया संलापमध्ययनमध्यापनमुपदेशनं च साधयामासुः। तदा हि नरपतीनां सभाभवनं विदुषां कवीनां च संस्कृतभाषणेन, संस्कृत-कवितोदीरणेन मुखरमासीत्। पुरा प्रतिवेशि-राजमण्डलमुद्दिश्य प्रेषितेषु पत्रेषु, दानपत्रसम्पादनेषु, गुणिभ्यो मानपत्रदान-संवर्धनादिषु, तथा च शिलास्तम्भ-मन्दिरगात्र-समुत्कीर्णलिपिषु, प्राचीनानुशासन-स्मृतिलेखेषु च संस्कृतभाषाया व्यवहारो दृश्यते। तदानीन्तनाः संस्कृतसाहित्य-निष्णाता भूपालाः संस्कृतभाषया नाटकादिकाव्यग्रन्थान् रचयामासुः, स्वस्ववंशीय-पूर्व-पूर्व-महीपालानां चरित-मालां च संस्कृतकोविदैः कविभिश्च कारयामासुः। रसामोदिनां तेषां नरपालानामाग्रहोत्कर्षेण, नेतृत्वेन च पर्वोत्सवादिप्रसंगेन राजनिलयेषु, संसत्सु, मन्दिरांगनेषु च संस्कृतनाटकानामभिनयः समनुष्ठितः। लोकशिक्षार्थं तथा पौराणामानन्दविधानार्थं च एवं व्यवस्थापितम्। तदा हि धर्माधि-करणेषु संस्कृतभाषानिबद्धानि व्यवहारशास्त्राणि प्रचलितान्यासन्। विचारकाले वादि-प्रतिवादिनां सत्यश्रावण-प्रतिज्ञापनादि च देवभाषया प्रयोजितम्। अद्य-त्वेऽपि लौकिकप्रयोजनेषु वयं बहुशः संस्कृतशब्दांस्तद्भवपदानि च व्यवहरामः। किं च संस्कृतभाषैव मुख्यतो भारतीयभाषाणां जननी। मनसां भावावेदने तथा श्रोतॄणामानन्दविधाने च सुरभारत्या अमोघा शक्तिः प्रभवति। अतो विद्याकामैर्जिज्ञासुभि-र्मुमुक्षु-साधक-यति-ब्रह्मचारि-व्रतिभिस्तथा गृहा-श्रमिभिः श्रेयोलाभार्थं प्रत्यक्षतः परोक्षतश्च संस्कृतग्रन्था अवश्यमेवानुशीलनीयाः।

इदानीं स्वाधीने भारतवर्षे संस्कृतभाषाया अधिकतरमनुशीलनं राष्ट्रकार्येषु लौकिकेषु च तस्याः सुप्रयोगाः विशेषकर्तव्यतामावहन्ति। संस्कृतभाषायाः सुप्रतिष्ठाविधानं विना जनमानस-संहतिराध्यात्मिकसमुन्नति-नैतिकोत्कर्षसमन्वितं देशप्रेमोद्दीपनं च न कथमपि संभरेयुः। अतश्चित्तोत्कर्षविधायिनीं सदाचार-प्रवर्तिणीमतीतगौरववाहिनीं च देवभारतीं न कथमपि वयं परिहरेम। जीव्याच्चैषा ततो यावच्चन्द्रदिवाकरमाकल्प-कल्पान्तस्थायिनी मृत्युञ्जयिनी देवभाषा विश्वेषां मंगलाय।

वक्ष्यमाण-नाटकम्—वाल्मीकिसंवर्धनाख्यमेतन्नाटकं प्राग्विरचितस्य मदीय-दस्युरत्नाकराभिधान-नाटकस्य सम्प्रसारणं नूतनोत्तररूपेण प्रकाशमापद्यते। "दस्युरत्नाकरं" "भरतमेलनं" चेति नाटकद्वयं पुरा कलिकाता-विश्वविद्यालया-ध्यापकप्रवरेणाशेषगुणनिलयेन तत्रभवताधुना च स्वर्गतेन डाः क्षितीशचन्द्र चट्टोपाध्यायमहोदयेन सम्पादिते "मञ्जूषेति" प्रख्यात-संस्कृतमासिकपत्र प्रकाशितम्। संस्कृतसाहित्यगगने भास्करसदृशं सारस्वतरत्नोपमं तं मनीषिणं श्रद्धया स्मरामि, कामये च महात्मनः शाश्वतसद्गतिं विषादाप्लुतचित्तेन। दिल्ली-भारतीयनाट्यसङ्घ-नेतृभिस्तथा वरोदा एम. एस. विश्वविद्यालयाध्यापक-श्रीयुक्त सि. सि. मेहृतामहोदयेन तथा च मद्राज-विश्वविद्यालयस्य प्रख्याताचार्य्य-माननीय-डाः श्री वि. राघवन् महोदयेन च युक्तभावेन सङ्कलिते "Bibliography of stageable plays in Indian Languages" इत्याख्यग्रन्थे पूर्वोक्तयो नाटकयोः संक्षिप्तविवरणमालोचितम्। तेभ्यो महात्मनेभ्यः सवहुमानां कृतज्ञतां विज्ञापयामि।

रचनायाः प्रेरणास्थानम्—संस्कृतकाव्यरचनायां प्रेरणादानार्थं मदीय-ज्येष्ठतातदेवानां चट्टलसंस्कृतमहाविद्यालयाध्यक्षाणां संस्कृतविद्यालयपरिदर्शकानां च प्राक्तन-वङ्गीय-संस्कृतपरिषदः प्रख्यातसदस्य-महामहाध्यापक-रजनीकान्त साहित्याचार्य्याणाममोघं स्नेहसिक्तशुभाशीर्व्वादं भक्तिगतचेतसा स्मरामि, मौलौ समुद्वहामि च नित्यधामगतानां तेषां महामनीषिणां स्नेहशुभेच्छां निर्म्माल्यरूपेण।

संस्कृतनाट्यरचनायां ममैकान्तिकोत्साहदातारोऽन्ये च ये मम शुभार्थि-मनीषिणः प्रत्यक्षतः प्रेरणादानेन मदीयरचनावली-श्रवणेन च भूयोभूयोऽनुराग-प्रदर्शनात् स्मरणीया भवन्ति, तेषु प्राक्तन-रङ्गपुरमण्डलान्तर्गत-ववन-पुराञ्चलभूम्यधिकारिणां वर्तमाने काशीधामनिवासिनां सिद्धसाधकानां श्रीमन्निर्मलानन्दस्वामिनां तथा च मयमनसिंह-नगरान्तर्गत-महाकाली-वालिका-विद्यामन्दिर-शिक्षकाणां भक्तप्रवर-श्रीयोगेशचन्द्रमजुमदार-महाशयानां नामद्वयं

श्रद्धयोल्लेखमर्हति। एभ्यो महात्मनेभ्योऽशेषश्रद्धासमन्विता कृतज्ञतां विनिवेदयामि।

संगीतानि—मत्कृतनाटकेषु आधुनिकरीत्या संस्कृतसंगीतानि विरच्य प्रवर्त्तितानि। संस्कृतनाट्येतिहासे ममायं प्रथमः प्रयासः। प्रयोगकाले संस्कृतच्छन्दोनिबद्ध-श्लोकानामुद्गायनं वर्तमानकाले गीतिकारैर्दुःसाध्यं वैचित्र्य-हीनञ्चेति दर्शनात्, संस्कृतगीतिकानां स्वरसौकर्यविधानार्थं मया वङ्गभाषानुरूपं स्वभावच्छन्दः प्रवर्तितम्, यथा छन्दसां निगडेन गीतिकायाः स्वरतरङ्गायिता वैचित्र्यमधुरा स्वभावगति र्न वाध्यते। यतः स्वतःस्फुरिणी गीतिमाला मधुरस्वरवैचित्र्येण प्रसरन्ती श्रोतॄणामानन्दं वर्धयतीति संगीतानां सार्थकता। अत्र दोषगुणाः सुधीभिर्विचारणीयाः। किञ्च, बहुषु सांस्कृतिकानुष्ठानेषु एतद्-गीतिकानां प्रयोगसार्थकता मां नितरां समुत्साहयति। तत्र च कलिकातायां रवीन्द्रशतवार्षिकानुष्ठाने मद्विरचित-संस्कृतसंगीतानां प्रथमसाफल्यं परिदृष्टम्।

अभिनन्दनम्—एतद्गीतिकानां सुललित-प्रयोगविधौ वर्धमान-विश्वविद्यालयस्य-संस्कृतविभागाध्यक्षाणामशेषविद्याभक्ति-प्रेममण्डितानां डः श्रीगोविन्दगोपाल मुखोपाध्याय-महोदयानां तथा सुललितकण्ठायास्तत्सह-धर्मिण्या श्रीमत्याः माधुरी देव्याः, श्रीमत्याः सुदक्षिणा-वन्द्योपाध्यायदेव्यास्तथा चाध्यापिकायाः श्रीमती-कृष्णा-दत्तजायायाः कृतित्वमपूर्वं गौरवमावहति। ततश्चैषां संस्कृतगीतिकानां मनोरमपरिवेषणे सार्थकरूपायणे च पश्चिम-वङ्गीयप्रशासनोच्चपदाधिकारिक-श्रीयुक्त सुशीलकुमार-वन्द्योपाध्याय-गीतसुधाकर-श्रीसत्येन्द्रनाथ रायमहाशय-हुगलीनिवासी श्रीसोमेशचन्द्रघोषाल-मदीय-प्राक्तनच्छात्र-श्रीमद्भोलानाथभट्टाचार्य- विभूतिमुखोपाध्याय-तपनवन्द्यो-पाध्याय-सुनीलघोष-विराज चट्टोपाध्यायानां तथा ममाशेषस्नेहभाजन-च्छात्रीणां श्रीमतीनामर्चनाभट्टाचार्य-मुकुलिका चट्टोपाध्याय-मिनति घोष-आरतिघोष-ज्योतिर्मयीवन्द्योपाध्यायप्रमुखाणां नामानि सविशेषमुल्लेखयोग्यानि। कृतिनश्चैते सुधियस्तथा च सुचरिता मातृमूर्तयो विद्यार्थिन्योऽतो नितरामभिनन्दनीयाः।

एतन्नाटकस्य रूपायणे सुललित प्रयोगसाफल्यात् कलिकाता-संस्कृतसाहित्य-परिषत्सदस्यांस्तथाध्यापकश्रीसुनीलेन्दुभट्टाचार्यप्रमुखां हुगलीसंस्कृत-परिषत्सदस्य-मण्डलीं विदग्धसारस्वतांश्च सश्रद्धं सानुरागं समभिनन्दामि।

नाटकस्य मर्मकथा—वाल्मीकिसंवर्धनमित्याख्यं दृश्यकाव्यं कलुष-निपीडितस्य मानवात्मनो बन्धनमुक्तेरितिहासः। आनन्दमय-स्वरूपप्राप्तेः संवादेन चिरमधुरा खलु महर्षिवाल्मीकेः साधना चिरं जयति। सुनिर्मला सा तपस्या भूमायामात्मसमर्पण-मन्त्रं प्रचारयति। साधुसङ्गरूप-स्पर्शमणेः प्रभावेण मर्त्योऽमृतत्वं लभते। नास्ति किञ्चित् तपसाऽसाध्यम्। अमृत-मेवास्मदुपास्यं साध्यं गन्तव्यञ्च। तत्साधनया मानवः पूर्णो भवतीति आख्यानस्यास्य शाश्वती वार्ता। सा हि वाल्मीकेः पुण्यचरितकथाभिषिक्ता प्रेमगङ्गाम्बुप्लावनेन चित्तं पावयति प्लावयति च भूतलमानन्दमय-भक्तिरस प्रवाहेण।

उपसंहारः—विवृतं मे मुखवन्धकथनम्। अत्र नाट्यरचनायां कृतित्वं मे किमपि नास्ति। अमृतात् प्रसरन्ति वाचः। शब्दमूर्तिधरस्य विष्णो-रिच्छया तत्कृपाप्रसादितचित्तेषु वचनानि स्फुरन्ति। मानसोद्गतभाव-कुसुमानां यथोचित-विन्यसनमेव साहित्यशिल्पिनः साधनम्। दीनो विद्या-विहीनोऽहमकिञ्चनो हृदयसमुद्गतानि भावकुसुमानि मुग्धो वालक इव समाहृत्य काव्यस्रजा वाग्देवतामर्चयामि। एतत्कृतिविहितं त्रुटिजातं सदयमुपेक्ष्य सुधियो महाभागा मे पुण्यव्रतं साफल्यमापादयन्त्विति सविनयं मया प्रार्थ्यते।

किं चैतन्नाटकस्य संस्कृत-साहित्यपरिषत्-पत्रिकायां प्रकाशने पण्डित-कुलपतीनां महामहोपाध्याय-श्रील-कालीपद-तर्काचार्याणां, परिषत्-संस्कृत-विद्यालयाध्यक्षाणां पण्डितप्रवर-श्रीरामधन-काव्यव्याकरणतीर्थानां यादवपुर-विश्वविद्यालयप्राध्यापकानां डाः श्रीमद्गोपिकामोहनभट्टाचार्य-काव्यन्याय-तीर्थानां तथा कलिकाता-संस्कृत-साहित्यपरिषत् सम्पादकानां डाः सत्यरञ्जन-वन्द्योपाध्यायानां सारस्वतव्रत-सुलभामुदारसहायतामनुस्मृत्य तेभ्योऽशेष-

कृतज्ञतां विज्ञापयामि। निवेदयामि च श्रद्धानतिं हुगली-त्रिवेणीनिवासिने मदात्मीयवरायाध्यापक-श्रीसतीशचन्द्रविद्यारत्न-काव्यतीर्थाय तदीयशुभानुध्यान-सहयोगित्वलाभात्।

भारतवर्षे सर्वे सुरभारतीसमर्चनपराः प्रसादयन्तु स्वात्मनो विनोदयन्तु च सामाजिकान् सारस्वतांश्च विद्यार्थिनो वाग्देवीप्रसादजेन दिव्यानन्ददानेन शाश्वतकालमिति। अत :—

वन्देऽहं करुणामुग्धो जननीं सुरभारतीं।
तत्पादमधुनिस्यन्दं प्रपिबानि मधुव्रतः॥

तेनैव च—पेपीयन्तां सुधां सर्वे संस्कृतसागरोद्भवां।
विश्वे च रमतां नित्यं भारती सुरनन्दिनी॥

ॐ शिवमस्तु

जन्माष्टमी — निवेदनमिति दीन-ग्रन्थकारस्य

१३७३ वङ्गाब्दाः — श्रीविश्वेश्वरविद्याभूषण-काव्यतीर्थ-देवशर्म्मणः।

अङ्कविन्यासः

एतन्नाटकीय दृश्याणामादौ तदन्ते च "दृश्यमिति"स्थले "अङ्क" इति अनवधानतया मुद्रितम् । तत्र "दृश्यमिति" बोद्धव्यम् । तेन अङ्कविन्यासो हि वक्ष्यमाणक्रमेण भविता ।

प्रथमोऽङ्कः	३ पृष्ठातः	२०	पृष्ठायां	प्रथम-दृश्याचतुर्थ-दृश्यान्तं यावत् ।
द्वितीयोऽङ्कः	२० ,,	२८	,,	पञ्चम-षष्ठदृश्यान्तपर्यन्तः ।
तृतीयोऽङ्कः	२८ ,,	३६	,,	सप्तमाष्टम-दृश्यान्तं यावत् ।
चतुर्थोऽङ्कः	३६ ,,	४२	,,	नवम-दशम-दृश्यान्तपर्यन्तः। ।
पञ्चमोऽङ्कः	४२ ,,	५०	,,	एकादश-द्वादशदृश्यान्तः ।

नाटकस्य समाप्तिसंगीतं भरतवाक्यत्वेन ग्रहणीयम् ।

अनिवार्यकारणनिमित्तानि अपराणि चाशोधनानि सुधीभिः कृपया क्षन्तव्यानीति सप्रश्रयं निवेद्यते, काम्यते च संशोधनं भाविसंस्करणेषु ।

महामान्य-राष्ट्रपतेः शुभाशंसनम्

राष्ट्रपतिभवन
नई दिल्ली-४
September 25, 1966

Dear Sri Visvesvar Vidyabhusan,

Thank you for your letter. I have looked into your book. It is an interesting effort and I hope it will be popular with the students of Sanskrit. …………with best thanks.

S/d. S. Radhakrishnan

अंशग्राहिणः सारस्वताः

आचार्य—डः श्रीगोविन्द गोपाल मुखोपाध्याय एम्. ए., डि. फिल्.,
सांख्यतीर्थ

अध्यापक—श्रीसिद्धेश्वर चट्टोपाध्याय एम्. ए., काव्यतीर्थ

,, श्रीरवीन्द्रनाथ भट्टाचार्य एम्. ए., वेदान्ततीर्थ

,, डः श्रीगोपिकामोहन भट्टाचार्य एम्. ए., डेर्. फिल्., डिः फिल्.,
काव्य-न्यायतीर्थ

,, डः श्रीअशोक चट्टोपाध्याय एम्. ए., डि. फिल्., पञ्चतीर्थ-शास्त्रि

,, डः श्रीब्रह्मानन्द गुप्त एम्. ए., डि. फिल्., आयुर्वेदतीर्थ

श्रीशक्तिप्रसाद मुखोपाध्याय वि. ए., काव्यरत्न

अध्यापिका—श्रीमती कृष्णा दत्त एम्. ए., एल्. एल्. वि.

श्रीमती तारा चट्टोपाध्याय एम्. ए.

श्रीमती माधुरी मुखोपाध्याय वि. ए.

श्रीमती सुदक्षिणा वन्द्योपाध्याय वि. ए.

—प्रमुखाः कलिकाता संस्कृत साहित्यपरिषत्सदस्यास्तथा

अध्यापक—श्रीसुनीलेन्दु भट्टाचार्य एम्. ए.

,, श्रीदीपक चट्टोपाध्याय एम्. ए.

,, श्रीगङ्गाशङ्कर चट्टोपाध्याय एम्. ए.

—प्रमुखाः हुगली संस्कृतपरिषत्सदस्यास्तथा

अध्यापक—श्रीध्यानेशनारायण चक्रवर्त्ती एम्. ए. साहित्यशास्त्रि

—प्रभृतयः ।

कलिकाताकाशवाणी-केन्द्रे तथाऽन्यप्रतिष्ठानेषु चाभिनीतम् ।

वन्दनम्

एको योऽव्यक्तरूपस्त्रिभुवननिलयो विश्वमुत्पाद्य रम्य-
मन्तः स्थित्वापि मूर्तौ विलसति बहुधा प्रेमलीलावतारः।
शोकानन्दैर्विचित्रामभिनय-कुशलो दक्षशिल्पीव नित्यं
लीलामानन्दसारो जगति वितनुते तं नटेशं भजामि ॥

पात्रवर्गः

पुरुषाः—

नान्दी-गायकौ

सूत्रधारः

पारिपार्श्विकः

रत्नाकरः [दस्युवृत्तिर्ब्राह्मणः]

पिङ्गलाक्षः [अनुचरः]

चण्डकेशः ,,

ब्रह्मा

नारदः

च्यवनः [रत्नाकरजनकः]

रत्नभानुः [रत्नाकरतनयः]

निषादः

अनुचरौ

भरद्वाजः, आत्रेयः, मैत्रेयः — वाल्मीकि-शिष्याः

अपरशिष्याः

आश्रमवासिनः

नार्य्यः—

नटी

स्वस्तिः [रत्नाकरजननी]

अस्ति [रत्नाकरपत्नी]

माधवी

वनतोषिणी

सुनन्दा

वनलक्ष्मीः

मधुमञ्जरी

मञ्जरिका

भारती



अध्यापक श्री विश्वेश्वर विद्याभूषण काव्यतीर्थः

वाल्मीकिसंवर्द्धनम्

नान्दी-गीतम्

भज मनो मे श्रीरामचन्द्रम्,
कौशल्यानयनमणिमहो राघवकुलचन्द्रम्।
मम मानसकुञ्जविहारी
विलसति रामो मनोहारी
नृत्यति प्रेमसरयूहृदि ससुखविलासम्।
नवदूर्व्वादल-श्यामसुन्दरः
जयतु रामो मुनिमनोहरः
कमललोचनं कमलाननं सीतापतिं भज रामम्।
वन्दे रघुनन्दनं प्रेमशरणमानन्दसुधासारम्॥

प्रस्तावना

[नान्द्यन्ते सूत्रधारः प्रविशति]

सूत्रधारः [प्रविश्य]—अहो! चिरमहिममयी अस्माकं जन्मभूमिः। देवयजनभूमिरियं भारतजननी शैलनिर्झरवनप्रान्तरमयी गङ्गायमुनासिन्धु-नर्म्मदा-पद्मा-मेघनामालिनी अतुलनीयां सुषमामातनोति। नानातीर्थ-पल्लीनगर-मन्दिरमनोहरा इयं पुण्यभूमिरेकां सुमहतीं संस्कृतिं वहन्ती भारतवासिनां चेतांसि भावगतैक्यसूत्रेण संयुनक्ति, परिपोषयति च तेषां हृदयानि प्रेमामृतेन। यातु, पश्यामि तावत्। [पुरतः सञ्चरति] अहो! गुणिगणमालिनीयं परिषद् अस्मदभिनयसन्दर्शनार्थं प्रतीक्षते। तद् आह्वयामि परिजनान्। [पार्श्वं गत्वा नेपथ्याभिमुखः] मञ्जरिके, आर्य्ये मञ्जरिके!

नेपथ्यान्मञ्जरिका—आर्य्य! किमादिशति भवान्?

सूत्रधारः—देवि, इहागच्छ।

मञ्जरिका [प्रविश्य]—आगच्छामि भगवन्। वन्देऽहं भगवन्तम्।

सूत्रधारः—विजयतां देवि ! श्रूयताम् ।

मञ्जरिका—कथ्यतामार्य्य !

सूत्रधारः—भद्रे ! आ हिमाचलाद् दक्षिणसागरतटान्तवासिनः पूर्व्वतः पश्चिमसिन्धुकूलं यावच्च निखिलभारतवासिनो यस्या देवभाषायाः प्रसादेन एकमपूर्व्वं संस्कृतिगतमैक्यं धारयन्ति तस्या महिमप्रचारार्थं जन्मभूमेर्गौरव-सम्पूजनार्थं च वयमद्य संस्कृतनाटकमभिनेतुम् अभिलषामः ।

मञ्जरिका—[सहर्षम्] अहो, साधु । तद् धन्या वयम् । यतो निखिल-रसभाण्डागारस्य विशालसंस्कृतसाहित्यसागरस्य सुधानिष्यन्देन विबुधा-नाराधयामः ।

सूत्रधारः—साधु साधु ।

छन्दोऽलङ्काररम्येयं देवभाषा सनातनी ।
शब्दब्रह्ममयी मूर्त्ता जयति विश्वमानसम् ॥

तन्निखिलानन्दविधायिनी ऋषिगणसेविता मधुरा संस्कृतभाषा स्वमहिम्नैव चिरं विजयते इत्यत्र किं वैचित्र्यम् ?

मञ्जरिका—जयतु सुरभारती । तदार्य्य ! किंनामधेयं नाटकमद्य अभिनयार्थं प्रस्तूयते तद् विज्ञातुमिच्छामि ।

सूत्रधारः—श्रूयताम् ।

रत्नाकरस्तपोयोगाद् बभूव वाल्मीकिः कविः ।
तत्पुण्यचरितं चाद्य नाट्यार्थं परिगृह्यते ॥

मञ्जरिका—अहो ! उत्तमम् । किं च भगवन् ! एतन्नाटकं केन विरचितं तदपि ज्ञातुं कौतूहलं वर्त्तते । कृपया कथ्यताम् कस्येयं कृतिरिति ।

सूत्रधारः—साधु भद्रे ! श्रूयतामेतत् ।

सुश्यामा घननीलशैलशिखरा स्निग्धा सरिन्मालिनी
रम्या काननकुन्तला किशलयैश्चारक्तचेलाञ्चला ।
लक्ष्मीर्मूर्त्तिमतीव सागरजलात् स्नातोत्थिता चञ्चला ।
बालार्केन्दुमयूखरत्नमुकुटा नक्तन्दिवं शोभते ॥

मञ्जरिका—अहो मनोहरम् ! ततस्ततः ?

सूत्रधारः—तत्रासीद् विप्रवर्य्यो विहितबहुतपाः श्रौतशास्त्रार्थनिष्ठः

श्रीकालीकिङ्कराख्यः कुलपतिसदृशस्तस्य पुत्रः प्रजातः ।

शास्त्राचार्य्यः प्रसिद्धः कुलमणिरजनीकान्त इत्येव तस्य

श्रीयुक्तः कृष्णकान्तः श्रुतिविमलमतिः सोदरोऽभूद् वरेण्यः ॥

मञ्जरिका—वाढम् । ततः किम् ?

सूत्रधारः—संनत्य भक्त्या गुरुपादपद्मं

वाणीं प्रणम्यामलपद्मसंस्थाम् ।

नाट्यं चकारेदमतः सुरम्यं

विश्वेश्वरो दीनसुतस्तदीयः ॥

तद् भारतीचरणारविन्दमकरन्दनिषेवणव्रतिना श्रीविश्वेश्वरविद्याभूषण-देवशर्म्मणा विरचितं वाल्मीकिसंवर्द्धनं नाम नाटकमद्य वयं प्रयोजयिष्यामः। तत् सर्वैरत्र संनह्यताम् ।

मञ्जरिका—यथाज्ञापयति आर्य्यः। एषाहम् आर्य्यपारिपार्श्विकादीन् विज्ञाप्य यावत् कर्त्तव्यं साधयामि । [इति निष्क्रान्ता]

सूत्रधारः—[विचरन्] जयतु भारती ।

नमामि वाल्मीकिमनन्तकीर्त्तिं, रामायणप्रेमरसात्ममूर्त्तिम् ।

वन्दे च वाणीं सितपद्मपाणिं, नाट्यार्थसिद्धिं वितनोतु सा नः ॥

[पटक्षेपः]

इति प्रस्तावना ।

प्रथमोऽङ्कः—वनपथः

वनबालिकाः प्रविश्य गायन्ति ।

गीतम्

श्रावणमेघो नीलगगने

विलसति चपला नयने नयने ।

धावत चलत प्रियसखीजनाः
कुरुत कुरुत केलिविलासम् ।
कुञ्जे कुञ्जे मल्लीमाला
नहि नहि पथि रौद्रज्वाला
मधुरा वीणा तन्द्राहीना
कुरुत कुरुतोल्लासम् ॥

[प्रस्थानं कुर्व्वन्ति]

[प्रविशतो रत्नाकरस्य अनुचरौ]

प्रथमोऽनुचरः—रे चण्डकेश ! इत इतः ।

द्वितीयोऽनुचरः—अरे ! कुत्र गमिष्यसि ? अत्रैव तिष्ठ । ननु अचिरेणैव सङ्घपतिरागमिष्यति ।

प्रथमः—भोः ! तथास्तु । एषोऽहमत्र तिष्ठामि । नाहमितोऽधिकं गमिष्यामि ।

द्वितीयः—अरे पिङ्गलाक्ष ! अद्य दिङ्मण्डलं मेघाच्छन्नमाभाति । तेन अकाले एव वनस्थल्यां छाया निपतति । दृश्यताम् , दिगन्तराले निलीयते दिवसस्य शेषालोकरेखा ।

प्रथमः—भोः चण्डकेश ! शोभनमेतत् । यत इयं वनच्छाया अस्माकं हिताय भविष्यति ।

द्वितीयः—साधु । न कोऽपि अस्मान् द्रक्ष्यति ।

प्रथमः—अथ किम् ? को नु अस्मिन् गहनवनपथे प्रच्छन्नानस्मान् विलोकयिष्यति ? तन्निश्चिन्तस्तिष्ठ ।

द्वितीयः—साधु ! किन्तु भोः पिङ्गलाक्ष ! अधुनापि सङ्घपतिर्न आयाति । तदधुना किं करिष्यामः ?

प्रथमः—अरे ! अलं चिन्तया । यावत्प्रभुर्नायाति, तावदत्र हरीतकीफलं चर्व्वयामः ।

द्वितीयः—धिग् धिक् । किं वयं तपस्विन आकाशवृत्तिमाचरन्तः कषायवनफलास्वादनेन जीवनं यापयामः ?

प्रथमः—अरे ! नहि नहि । अहं केवलं कालक्षेपार्थं कौतुकं करोमि ।

द्वितीयः—साधु साधु । तदेहि तावद् आवां परस्परं शक्तिपरीक्षणं करवाव ।

प्रथमः—उत्तमः प्रस्तावः । आगम्यताम् । प्रथमम् अहमेव शक्तिं दर्शयामि । [अभिगम्य मुष्टिघातं प्रदर्शयति] एषोऽहं त्वयि मुष्टिघातं करोमि । निरोधय मम वज्रमुष्टिम् ।

द्वितीयः [सदर्पं प्रत्याघातं करोति]—अरे ! उपहससि माम् ? एषः अहमपि प्रत्याघातमुपहरामि । कथम् ? अस्ति ते निस्तारसामर्थ्यम् ?

प्रथमः [सशब्दमभिगम्य]—तर्हि रे ! आश्रयस्व भूमितलम् । ननु तृप्तोऽसि ? अधुना जानीहि मे सामर्थ्यम् ।

नेपथ्ये रत्नाकरः—रे रे !

प्रथमोऽनुचरः—शान्तम् शान्तम् ! भोः सङ्घपतिरागच्छति ।

द्वितीयः—तदधुना निवृत्तस्तिष्ठामि ।

[प्रविशति रत्नाकरः]

रत्नाकरः—कः कोऽत्र भोः ? अरे, कुत्र मे सहचराः ?

प्रथम—जयतु रत्नाकर ! दस्युपते, वयं तव कृते चिन्तयामः ।

रत्नाकरः—शान्तं पापम् । को न जानाति, यद् रत्नाकरे जीवति नास्ति सुहृदां भयकारणम् ? तदहं वोऽभयं प्रयच्छामि ।

प्रथमः—स्वामिन् ! चण्डभानुरिव प्रचण्डप्रतापो भवान्, वयमपि भवतो निदेशपालकाः ।

रत्नाकरः—अभयम् अभयम् । विजयध्वं यूयम् । [अनुचरौ प्रति] तत्, चण्डकेश ! का हि वार्त्ता ? भोः पिङ्गलाक्ष ! कथय वृत्तान्तम् ।

द्वितीयः—प्रभो ! कमपि पान्थं न पश्यामि । तत् समादिश्यतां किमधुना करणीयमिति ।

[नेपथ्ये नारदो गायति—हरे मुरारे मधुकैटभारे
गोपाल गोविन्द मुकुन्द शौरे ।]

रत्नाकरः [अनुच्चस्वरेण]—भोः, श्रूयते कस्यचित् कण्ठस्वरः। तन्मौनं स्थीयताम्। अहमपि पश्यामि, कोऽयमायाति ।

[अन्तरालं गच्छति]

[नेपथ्ये नारदगायति—यज्ञेश नारायण कृष्ण विष्णो, निराश्रयं मां जगदीश रक्ष ।]

प्रथमः—अहो भाग्यम्। वहुक्षणात् परं सौभाग्यमुपस्थितम्। मन्ये कोऽप्यायाति ।

द्वितीयः—शान्तम्, शान्तम्। मा कुरु शब्दम्।

रत्नाकरः [अन्तरालान्निर्गत्य]—अरे। अन्तरालं गच्छ। प्रच्छन्नो भव निःशब्दम्। ततश्च प्रतीक्ष्यतामागमनं वैदेशिकस्य ।

[द्वितीयोऽनुचरः कुञ्जान्तराले प्रच्छन्नो भवति]

प्रथमः—दस्युराज ! दृश्यतेऽदूरे कश्चित् परिव्राजकः। अपरश्च कश्चित् तमन्वागच्छति ।

रत्नाकरः—पिङ्गलाक्ष ! त्वमिह तरूणामन्तराले निगूढस्तिष्ठ। मा कुरु शब्दम् ।

प्रथमः—प्रभो ! तथाहं करोमि। [अन्तर्धत्ते]

रत्नाकरः—तथास्तु। अहमपि इह लताकुञ्जे आत्मानं प्रच्छादयामि।

[तथा करोति]

[ब्रह्मणा सार्द्धं नारदो गायन्नागच्छति]

नारदः [प्रविश्य]—

हरे मुरारे मधुकैटभारे, गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो, निराश्रयं मां जगदीश रक्ष ॥

ब्रह्मा—देवर्षे ! अत्रैव वने गहने सानुचरो रत्नाकरो विचरति । तत सावधानं चलितव्यम् ।

नारदः—प्रजापते ! नूनम् एवंविधो विविक्तप्रदेश एव दुर्वृत्तानां विहार-स्थलम् । तन्नारायण एव शरणम् ।

[अन्तराले वंशी ध्वनति, अपरपार्श्वाच्च द्वितीयोऽनुचरः वंशीं वादयति]

नेपथ्ये रत्नाकरः—त्वर्य्यताम् त्वर्य्यताम् । क्रियताम् अनयो-र्गतिरोधः ।

अनुचरौ [उच्चैर्हुङ्कारं कृत्वा निर्गत्य]—अरे तिष्ठत, तिष्ठत । मा कुरुतं पदक्षेपम् ।

ब्रह्मनारदौ—अहो ! जगन्नाथोऽस्मान् रक्षतु । मधुसूदन रक्ष माम् , मधुसूदन ! रक्ष माम् ।

[अनुचरौ सोल्लासं वहिरागम्य ब्रह्मनारदयोः पन्थानं रोधयतः]

प्रथमः [ब्रह्मनारदौ अभिगम्य]—भोः विरम्यताम् , विरम्यताम् । अलं पदक्षेपेण ।

ब्रह्मनारदौ—भ्रातरः, असहाया वयम् । प्रसीदत साधुजनेषु ।

द्वितीयः—मैवम् ! यदि पलायितुं चेष्टसे तदा हनिष्यामि । [एकैकं प्रति] अधुना दीयन्तां धनानि । प्रदीयतां यदस्ति ।

ब्रह्मनारदौ—भद्रौ, नास्ति अस्माकं धनम् । किं वा दास्यामः ?

अनुचरौ [अट्टहास्यं कुरुतः]—हाः-हाः हाः । एतद्धि पलायनकौशलम् । एतौ छलनां कुरुतः ।

ब्रह्मा—भ्रातरौ, न वयं कौशलं जानीमः । न वा प्रतारणे अभ्यस्ता वयम् ।

द्वितीयः—अलं कापट्येन । यदि जीवितुमिच्छथः, तदा सर्व्वस्वं समर्पयतम् । अन्यथा सुनिश्चितो मृत्युदण्डः ! [भूमौ प्रचण्डशब्देन लगुडाघातं करोति ।]

ब्रह्मनारदौ—अब्रह्मण्यम् अब्रह्मण्यम् ! मा मा अस्मान् मारय । [उच्चैः] कः कोऽत्र भोः ! रक्षास्मान् दस्युकवलात् । रक्ष दस्युकवलात् ।

[प्रविशति रत्नाकरः]

रत्नाकरः—आः, क इह रक्षिष्यति ? न ज्ञायते किम् , यद् भुवनत्रासकरो रत्नाकरोऽत्र निरङ्कुशो विहरति ?

ब्रह्मनारदौ—रत्नाकर, रत्नाकर !

रत्नाकरः—भोः, अलं चातुर्य्येण । नास्ति फलमनुनयेन । हितं वदामि । दीयतां सर्व्वं यदस्ति ।

नारदः—भ्रातः, एतद् वीणायन्त्रमेव मम सम्बलम् । अनया भगवन्नाम गायामि ।

ब्रह्मा—सत्यमाह एषः । भ्रातः, अकिञ्चना वयं परिव्राजकाः । अस्माकं कपर्द्दकमपि नास्ति ।

प्रथमः—भोः, न हि विगलिष्यति दस्युहृदयं करुणवचनेन । अस्माकम् आदेशं पालय ।

ब्रह्मा—भद्र ! अकिञ्चना वयं ब्रह्मचारिणस्तीर्थेषु परिभ्रमामः । तन्मुञ्च अस्मान् ।

रत्नाकरः—वैदेशिकाः, न खलु दस्यूनां करुणा सम्भवति । तत् स्थिरौ तिष्ठतम् । [अनुचरौ प्रति] भोः, अनयोरङ्गानि अनुसन्धाय गृह्यतां सर्व्वं गुप्तं धनजातम् ।

अनुचरौ—तथास्तु । भोः, एते वयं युवयोर्वसनाच्छादनादिकमवलोकयामः ।

रत्नाकरः—अपह्रियतां यथासर्व्वस्वम् ।

[अनुचरौ ब्रह्मनारदयोः कमण्डलुवीणायन्त्रादिकं सुनिपुणं परीक्षेते ।]

ब्रह्मा—भ्रातरः, अनेन कमण्डलुनाहं सलिलमाहरामि । केवलमेतदुत्तरीयखण्डमेव आच्छादनम् ।

नारदः—अहमपि उदासीनः अनेन वीणायन्त्रेण भगवन्नामगानं करोमि ।

अनुचरौ [रत्नाकरं प्रति]—प्रभो ! एतयोः सर्व्वाङ्गं निरीक्षितम् । किन्तु न किञ्चित् प्राप्नोमि ।

रत्नाकरः [ब्रह्मनारदौ प्रति]—भोः, अनेन चातुर्य्येण न कथमपि जीवनरक्षा सम्भविष्यति । तद् अर्थसमर्पणेन आत्मरक्षा विधीयताम् ।

ब्रह्मा—दस्युपते ! अस्माभिः सर्व्वाङ्गमुन्मोच्य प्रदर्शितम् । न वयं मिथ्या व्यवहरामः । तन्मुच्येताम् असहायौ तपस्विनौ ।

नारदः—प्रसीद दस्युपते ! रक्ष नौ जीवनम् ।

रत्नाकरः [स्वगतं चिन्तयति]—तत् कथमेवं भवति ? महता आयासेनापि न लभ्यते अनयोर्धनादिकम् । अहो, आश्चर्य्यम् !

ब्रह्मा—दस्युराज ! प्रष्टुमिच्छामि त्वां किञ्चित् ।

रत्नाकरः—किं कथयसि ?

अनुचरौ [रत्नाकरं प्रति]—प्रभो ! मायाविनावेतौ । मा कुरु विश्वासम् ।

रत्नाकरः—अरे ! अलं शङ्कया । न कोऽपि रत्नाकरं छलयितुं शक्नोति । [ब्रह्माणं प्रति] भोः, कथय, किं प्रष्टुमिच्छसि ?

ब्रह्मा—दस्युपते ! अनया दस्युवृत्त्या कथं त्वं दुर्वहं पापराशिं वृणोषि ?

रत्नाकरः—[अट्टहास्यं करोति] हाः-हाः-हाः । जीविकार्था दस्युवृत्तिः पापम् ? कथमियं पापाय भविष्यति ?

ब्रह्मा—अथ किम् ? एतल्लुण्ठननरहत्यादिकं पापमेव । किञ्च, पापानि परिणामे भयङ्कराणि दुःखानि जनयन्ति, भवन्ति च दारुणनरकाय ।

रत्नाकरः—धिग्धिक् । दस्युरत्नाकरोऽहं त्रासकारणम् अशेषभूमण्डलस्य । मद्भयात् प्रकम्पते धरातलम् । तदहं कुतो वा बिभेमि ? भोः, नास्ति मे पापाद् भयलेशः ।

ब्रह्मा—किन्तु भद्र ! पापं रमणीयमपि परिणामे अशेषदुःखमुत्पादयति । रत्नाकर ! अतीव क्लेशमयो हि पापस्य परिणामः । स हि असंशयं भयङ्करः ।

रत्नाकरः—आः, परिजनपोषणार्थं दस्युवृत्तिर्मया गृहीता। तया कथं मे पापं भविष्यति? किञ्च दस्युवृत्तिः पापाय चेत् तदा स्त्रीपुत्रजनकादयो मे पापभागिनो भविष्यन्ति।

ब्रह्मा—किमेतत् तव परिजनैः स्वीकृतम्?

नारदः—अपि अभिमतं ते पापजातं तव परिजनानाम्?

रत्नाकरः—नाहं तानेतत् पृष्टवान्।

ब्रह्मा—नैतदुचितम्। गच्छ ते भवनम्। पृच्छयन्तां च परिजनाः। अन्यथा कथमेक एव त्वं दुःखभोगं करिष्यसि?

रत्नाकरः [विचिन्त्य]—युक्तमेतत्। प्रक्ष्यामि परिजनान्। अन्यथा कथमेकोऽहं सर्व्वेषां कृते पापानि आचरिष्यामि? [स्वगतं कथयति] किन्तु! इमौ सन्त्यज्य कथमहं गृहं गच्छामि?

प्रथमोऽनुचरः—अलं चिन्तया स्वामिन्! वयमत्र दण्डपाणयः इमौ परिवृत्य तिष्ठामः। यथेमौ न पलायेते तथात्रास्माभिः सावधानं स्थीयते।

द्वितीयः—वयमेतौ अवरुध्य स्थिताः। तन्निःशङ्कं गृहं गम्यताम्।

रत्नाकरः—साधु साधु। आनय तावत् सुदृढं बन्धनरज्जुकम्। तेनेमौ बद्ध्वा अवरुध्य स्थीयताम्।

प्रथमः [किञ्चिद् गत्वागत्य]—एषानीता रज्जुः, गृह्यतामियम् [रज्जुं समर्पयति]

रत्नाकरः [गृहीत्वा]—उत्तमम्। अनेन वनस्पतिना सार्द्धम् इमौ दृढ-बन्धनबद्धौ विधाय परिवृत्य स्थीयताम्। तथा च प्रतीक्ष्यतां यावदहं प्रत्यागच्छामि। [प्रस्थानं करोति]

[अनुचरौ च ब्रह्मनारदौ रज्जुबद्धौ कुरुतः]

प्रथमः [ब्रह्मनारदावुपलक्ष्य]—भोः, निश्चलमवस्थातव्यम्। न हि करणीयः पदक्षेपः।

द्वितीयः—न खलु पलायने उद्यमः करणीयः। [उभौ परिवृत्य अनुचरौ रक्षतः] एते वयं दण्डधरास्तिष्ठामः [भ्रुकुटिं प्रदर्शयति]

ब्रह्मा [स्वगतम्]—अहो भाग्यम्! वयं हि—

नलिनीदललोभेन चरन्तः सरसीजले।
मराला इव संप्राप्ता दुःसहं कण्टकक्षतम्॥

नारदः—ब्रह्मन्! रत्नाकरसमुद्धार एव अस्माकं कार्यम्। तस्मात् लोकहितार्थं गृह्यतेऽयं परिक्लेशः। यतः—

त्रैलोक्यस्य हितार्थाय नीलकण्ठः पपौ विषम्।
रत्नाकरकृतेऽस्माभिर्गृहीतं तेन बन्धनम्॥

इति प्रथमोऽङ्कः।

द्वितीयोऽङ्कः—रत्नाकरभवनम्

[रत्नाकरजनकश्च्यवन उपविष्टश्चिन्तयति]

च्यवनः—क्लेशकरो वार्द्धक्यकालः। अधुना शक्तिर्मे न स्फुरति। कम्पते च कलेवरः। किञ्च, शीतजीर्णो वनस्पतिरिव जराग्रस्तानि अङ्गानि कष्टेन धारयामि।

[प्रविशति च्यवनपत्नी स्वस्तिः]

प्रविश्य स्वस्तिः—कान्त! किं कथयसि? किं वा त्वां बाधते?

च्यवनः—प्रिये! एषा जरा मां पीडयति। किन्तु अस्ति मे अधिकतरं दुःखकारणम्, तद्धि मनो नितरां क्लेशयति। यतः,

रत्नाकरस्य पापेन कुलं मम प्रणश्यति।
अयं दहति मां वह्निः, पश्यामि न च निष्कृतिम्॥

स्वस्तिः—स्वामिन्! एष खलु प्राकृतिको नियमो यत् जरा देहिनं ग्रसते। तथापि तव क्लेशलाघवार्थमस्माभिर्यथाशक्ति चेष्टा क्रियते। किन्तु कथ्यताम्, किमन्यत् ते दुःखकारणं भवति?

च्यवनः—प्रिये! अवहितोऽहं युष्माकं परिचर्य्यासु। किन्तु, रत्नाकरस्य दुष्कृतिं चिन्तयन्, नाहं शान्तिमधिगच्छामि।

स्वस्तिः—[स्वगतम्] हा भाग्यम्! पुत्रो मे दस्युवृत्तिमाचरति, किमहं

करोमि ? यातु प्रवोधयामि भर्त्तारम् । [प्रकाशम्] समाश्वसिहि स्वामिन् । पुत्रमहं बोधयिष्यामि, स हि गुरुवचनं न लङ्घयिष्यति ।

च्यवनः—किन्तु प्रिये ! चिरात् पापकर्मनिरतः पुत्रः किं तव वचनाद् दुष्कार्य्यं परित्यक्ष्यति ?

स्वस्तिः—नाथ ! जननी खलु तस्याहम् । विन्दुशः स्तन्यदानेन महता क्लेशेनासौ मया पालितः । तदहं तनयस्य मतिपरिवर्त्तनार्थं सर्व्वविधं प्रयत्नं करिष्यामि ।

च्यवनः—साधु । तदेव क्रियताम् । उपदिश्यतां नन्दनो यथासौ भद्रमाचरति ।

स्वस्तिः—अलं वाहुल्येन नाथ ! तथाहं करिष्यामि । तदिदानीं विषादं मुञ्चतु, स्वामिन् । मा पुनर्मनोदुःखेन आत्मानं पीडय ।

च्यवनः—[दीर्घं निःश्वस्य] भद्रमस्तु । अपगच्छतु दुःखम् । नारायण एव शरणम् । नारायणः नारायणः ।

[प्रविशति रत्नाकरः]

रत्नाकरः—अम्ब !

स्वस्तिः—एहि प्रिय ! तातस्ते त्वत्कृते चिन्तयति ।

रत्नाकरः—नमस्ते मातः । पितर्नमामि भवन्तम् । [प्रणमति]

च्यवनः—स्वस्ति स्वस्ति । धर्म्मस्ते वर्द्धताम् । [आशिषं करोति]

रत्नाकरः—मातः, प्रसीद मयि ।

स्वस्तिः—शतं जीव पुत्र ! वर्द्धस्व पितृपुण्येन ।

च्यवनः—वत्स रत्नाकर ।

रत्नाकरः—पितः, किं कथयति भवान् ? आदिशतु माम् ।

च्यवनः—तात ! अपि कुशलं तव ?

[रत्नाकरो नतमुखो मौनी तिष्ठति]

स्वस्तिः—किं चिन्तयसि पुत्र ? दीयतां जनकाय प्रतिवचनम् ।

[रत्नाकरो निरुत्तरस्तिष्ठति]

[स्वस्ति: पुत्रमाद्रियते] तात ! कथय, कथं त्वां चिन्ताकुलं पश्यामि ?' विषादमलिनं ते मुखकमलं विलोक्य न वयं शान्तिं गच्छामः ।

रत्नाकरः—मातः, कथयामि तत् । किन्तु प्रष्टुमिच्छामि किञ्चित् तातपादम् ।

च्यवनः—स्वच्छन्दं ब्रूहि श्रीमन् ।

रत्नाकरः—पितः ! केचित्तपस्विनो वदन्ति, परिजनपोषणार्था मे दस्युवृत्तिः पापमिति ।

च्यवनः—अथ किम् ? चौर्य्यं दस्युवृत्तं वा पापमेव । किञ्च, अन्येषां पीडनमपि पापम् । विशेषतो नराणां प्राणहरणं महापापम् । तत्, पुत्र ! कथमधर्म्मम् आचरसि ?

रत्नाकरः—तात ! भवतां परिजनानाञ्च भरणपोषणार्थं मया पापमनुष्ठीयते ।

च्यवनः—वत्स ! वार्द्धक्ये जनकजनन्योर्भरणपोषणं पुत्राणामवश्यकर्त्तव्यम् । परिजनाश्च पालनीयाः । किन्तु साधुनोपायेन तत् करणीयम् । यतोऽधर्म्मः सर्व्वथैव भयङ्करः ।

रत्नाकरः—किन्तु, परिजनानां पोषणार्थम् अहमेवं करोमि ।

च्यवनः—तदर्थं दस्युवृत्तिर्न मयोपदिष्टा । त्वया स्वेच्छया साधुजनविगर्हितः पन्था अवलम्बितः । किञ्च दुर्जनसङ्गाद् धर्मविधिं विहाय असाधुजीविका गृह्यते ।

रत्नाकरः—तदा के मम पापभागं ग्रहीष्यन्ति ? नूनमत्र परिजनानामपि पापभागो वर्त्तते । यतस्तेषां कृते मया पापमनुष्ठीयते ।

च्यवनः—नहि नहि । कथं निरपराधाः परिजनास्तव पापभागं ग्रहीष्यन्ति ? पापं तु कर्त्तरि फलति । यत्पापं तत्र गच्छति । अत्र त्वमेव प्रमाणम् ।

रत्नाकरः—[सविषादम्] अहो कष्टम् ! तदा मे को हि परिणामः ? एतद्दुष्कृतिभारः केवलं मयैव कथमुह्यते ?

च्यवनः—श्रृणु रत्नाकर ! पापेन जीविकार्ज्जनं न खलु ब्राह्मणधर्म्मः । तस्मात् सर्व्वथैव अशुभकरीयम् आसुरीवृत्तिः पापिनं नरकं गमयति । तत्त्यजेदं पापाचरणम् ।

रत्नाकरः—[शिरस्ताडयन्] अहो धिग्माम् , धिग्माम् ! [जननीं प्रति] अम्ब, अम्ब ! त्वमपि किं कथयसि ? किं न ग्रहीष्यसि त्वं मे दुष्कृतिभागम् ? [स्वस्ति निरुत्तरा तिष्ठति]

च्यवनः—[पत्नीं प्रति] भोः ! दीयतां प्रतिवचनं पुत्राय । [पुत्रं प्रति] पुत्र, श्रूयतां जननी ते किं कथयति ।

रत्नाकरः—मातः कथय मनोगतम् । मां निःशङ्कं कुरु ।

स्वस्तिः—[सविषादम्] वत्स ! किमहं कथयामि । एष जनकस्ते मम हृद्गतं कथयति ।

रत्नाकरः—[विलपन्] अहो ! असहायोऽहमशरणः । को मां त्रास्यते ? कथं वा विशालं पापभारमेकाकी उद्वहामि ? एषा जननी अपि मां त्यजति !

च्यवनः—वत्स ! सुशीलो भव । समाचर गार्हस्थ्यधर्म्मं सदुपायेन । अहं ते शान्तिपथमुपदिशामि । जानीहि, कर्म्मफलं न कोऽपि अतिक्रमितुं शक्नोति ।

रत्नाकरः—अहो ! असारः संसारः । तदहं स्वजनविरहितस्तमसि विहरामि । को मां त्रास्यते ? को मां पापाद् रक्षिष्यति ? [उच्चैर्विलपन् प्रस्थानं कुरुते]

स्वस्तिः—भगवन् , भगवन् ! रक्ष पुत्रम् । [व्याकुला तमनुगच्छति]

च्यवनः—नारायण, नारायण !

इति द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः—रत्नाकरस्य कक्षाभ्यन्तरम्

[रत्नाकरपत्नी अस्तिगृंहद्रव्याणि सन्निवेशयति । प्रविशति रत्नाकरः ।]

प्रविश्य रत्नाकरः—प्रिये ! एषोऽहमागच्छामि ।

अस्तिः—[उपसृत्य] आगच्छतु, स्वामिन्। उपविशतु भवान्। कथमद्य विमनायमानं त्वां पश्यामि?

रत्नाकरः—कथयामि प्रिये! किन्तु, प्रष्टुमिच्छामि किञ्चिद् भवतीम्।

अस्तिः—कथय स्वामिन्।

रत्नाकरः—प्रिये! संसारोऽयं न मां परिगृह्णाति। स्वजना मां त्यजन्ति। तत् को मे उपायः?

अस्तिः—शान्तं पापम्। को नु आत्मजनं त्यजति? मैतत् कथ्यताम-शुभवचनम्

रत्नाकरः [सोच्छ्वासम्] प्रिये! अशुभमयं हि रत्नाकरस्य जीवितम्। नरकेऽहं निपतितः। तत् को मां रक्षिष्यति?

अस्तिः—कान्त! नाहमवगच्छामि ते वचनम्। कथं मानसिको विपर्य्ययस्त्वाम् आकुलयति?

रत्नाकरः—प्रिये! पापोऽहं कलुषाचारो दस्युवृत्त्या जीविकामर्ज्जयामि। तेन पितरौ मां त्यजतः।

अस्तिः [कातरा]—भो मा त्वमकरुणो भव। कथय वृत्तान्तम्। रक्ष माम्। अहं खलु अतीव मन्दभाग्या।

रत्नाकरः—शृणु प्रिये! निषादवृत्तिरहं धर्म्मभ्रष्टो ब्राह्मण्याद्विच्युतः। अतः पतितोऽहं पितृभ्यां परित्यक्तः।

अस्तिः—भोः, कथं कल्पितसन्तापेन आत्मानं क्लेशयसि? न खलु आर्य्यपादस्त्वां मुञ्चति न वा परितत्यक्तुं शक्नोत्यम्बा।

रत्नाकरः—नहि नहि। अहं सत्यं वदामि। असदुपायेन मे जीविकार्ज्जनं तातो न समर्थयति। महता कष्टेनाहं परिजनपोषणं करोमि। किन्तु सर्व्वेषां भरणपोषणकृते मत्कृतकर्म्मणः फलं केवलं मयैव भोक्तव्यमिति तातः कथयति।

अस्तिः [स्वगतम्]—अहो दौर्भाग्यम्! [प्रकाशम्] अथाधुना किं वक्तुमिच्छसि?

रत्नाकरः—अहं ब्रवीमि, 'यत् परिजनानां परिपोषणार्थं मया सर्व्वमसाधु कृत्यं क्रियते, सर्व्वे परिजनास्तस्य फलभागिनो भवेयुरिति। किन्तु पिता तत् कथमपि न स्वीकृतम्। तेनोक्तं मत्पापफलं न हि स ग्रहीष्यतीति।

अस्तिः—हन्त! तर्हि किं वा समुदीरितम् आर्य्ययाम्बया?

रत्नाकरः—जनन्यापि अहं तथैव निराकृतः। सापि मत्पापफलभागं न ग्रहीष्यतीति विज्ञापितवती।

अस्तिः—हा दौर्भाग्यम्! तद्धि किं भविष्यति? को वा मां मन्दभागिनीं द्रक्ष्यति?

रत्नाकरः—प्रिये! दीनोऽहमशरणः इदानीं दुस्तरे दुःखसागरे पतितः। अहं दुराचारः कलङ्ककलुषितः। दुर्जनसङ्गः, परधनहरणं, लुण्ठनं, नरहत्या वा न किमपि अवशिष्यते यदहं नानुतिष्ठामि। तदहं नरके पतितोऽस्मि।

अस्तिः—विरम विरम नाथ! मा मा श्रावय मां तव दुष्कर्म्मकथाम्। मन्दभागिनी चाहं दुःखाय जीवामि [सविषादं विलपति]

रत्नाकरः—प्रिये! इमं कलङ्ककरमात्मवृत्तान्तं प्रकाश्य दुर्वहहृदयतापं प्रशमयितुमिच्छामि। कथय, अपि पापभागं त्वं मे ग्रहीष्यसि?

अस्तिः [स्वगतम्]—अहो दहति दुःखानलः। अनाथाहं वृथैव जीवामि! धिङ्मां धिङ्मां मन्दभागिनीम्! [मुखमाच्छाद्य तिष्ठति]

रत्नाकरः—प्रिये कथय माम्, अधुना सर्व्वमहमन्धकारं पश्यामि। तत् स्वीकृत्य मे कर्म्मफलभागं रक्ष मां करालान्मृत्युग्रासात्।

अस्तिः—[शोकविह्वला]—निष्ठुर! जहि माम्। मारय मां दग्धजीवितधारिणीम्। नातःपरमिच्छामि जीवितुम्!

रत्नाकरः—प्रिये, प्रिये!

अस्तिः—भो, देहि मे मुक्तिम्। विसृज माम्। शान्तिं देहि मे मृत्युदण्डदानेन। [नयनमुखमाच्छाद्य विलपति।]

रत्नाकरः [उत्थाय] अहो! आकण्ठपापमग्नस्य मे न कोऽपि सहायो भविष्यति। न मे माता, नास्ति जनकः, नास्ति जाया, न कोऽपि कर्म्मफल-

भागी। एष दुस्तरोऽन्धकारः—मृत्युकरालोऽन्धकारः! ज्वालामयान्नरकात् न कोऽपि मां त्रास्यते। [प्रस्थानं करोति]

अस्तिः—स्वामिन्, पश्य माम्, पश्य माम्,!

इति तृतीयोऽङ्कः

चतुर्थोऽङ्कः—वनपथः

[तरुणा सार्द्धं रज्जुवद्धौ ब्रह्मनारदौ तिष्ठतः। पुरतः पार्श्वयोरनुचरौ आलपतः।]

प्रथमः—रे चण्डकेश! अस्माकं सङ्घपतेरागमने विलम्बो भवति। तद् इहागच्छ। उपविश। इमं नीरसमवसरं प्रमोदेन यापय।

द्वितीयः—भोः पिङ्गलाक्ष! चिरं दण्डायमानोऽहमपि क्लान्तः। तद् उत्तमोऽयं प्रस्तावः। किन्तु यथेमौ न पलायेते, तथा विधातव्यम्।

प्रथमः—अरे। अलं शङ्कया। दृढबन्धनवद्धौ इमौ परिव्राजकौ। तेनानयोः पलायनमशक्यम्। साम्प्रतमस्माभिर्गुण्डिकासेवनं करणीयम्। [करतले गुण्डिकां निर्माय परस्परं विनिमयपूर्व्वकं सेवते।]

द्वितीयः—[सहर्षं गृहीत्वा मुखेऽर्पयति] अहो मधुरम्। नितरां मधुरम्। [गायति] मधुरं पायसम्, मधुरं पायसम्, मधुरं मधुरमवसरसमये गुण्डिकासेवनम्]।

[अदूरे ब्रह्मनारदौ आलपतः]

नारदः—पद्मयोने! एते वनचरा दुर्लभं मनुष्यजन्म लब्ध्वापि जीवनं व्यर्थतां नयन्ति।

ब्रह्मा—देवर्षे! कर्म्मफलेनैव एतेषां शोचनीया जीवनयात्रा। तेन रत्नाकरोऽपि अधःपतितः।

प्रथमोऽनुचरः—[द्वितीयं प्रति] अरे! एते किं कथयन्ति?

[ब्रह्मनारदौ उद्दिश्य] भोः, किं कथयथः ? किं पलायनमिष्यते ? मा कुरुत मा कुरुत दुःसाहसम् ।

द्वितीयः—भो नास्ति निस्तारः । हाः हाः ! मुक्तगतीर्विहङ्गौ पाशबन्धनमापादितौ । अतः को युवां त्रास्यते ?

अदूरे पुनर्ब्रह्मा—[स्वगतम्] धिक् । कालपाशबद्धा इमे मर्त्या मोहवशाद् , आत्मनां परित्राणं न चिन्तयन्ति, किञ्चास्मान् उपहसन्ति । [नारदं प्रति] देवर्षे ! इयं हि संसारमाया !

नारदः—मायासागरः, दुस्तरो मायासागरः !

[नेपथ्ये रत्नाकरः—माया,, माया, भयङ्करी संसारमाया ।]

[ब्रह्माणं प्रति] श्रूयतां कमलासन ? रत्नाकरोऽधुना निर्वेदमापन्नः अनुशोचति ।

[पुनर्नेपथ्ये रत्नाकरः] हा धिक् ! न मे स्वजनः, न पिता, न माता, न च कान्ता । ततो धिगिमां स्वार्थपङ्किलां मोहमयीं संसारमरीचिकाम् !

ब्रह्मा—देवर्षे ! एषोऽनुतापदग्धो रत्नाकरः समागच्छति । तत् पश्यामि एष किं करोति । [रत्नाकरः प्रविशति]

[रत्नाकरमुद्दिश्य] आगच्छ रत्नाकर ! अधुनास्मान् मोचय ।

रत्नाकरः [विषादकम्पितस्वरः] —भगवन् , नाहं क्षमायोग्यः । मूढमतिर्नराधमोऽहं पापराशौ निमज्जामि । नास्ति मे सहायः ।

नारदः—रत्नाकर ! परिजनास्त्वां किं कथयन्ति ? अपि स्वीकृतस्तैस्तव पापभागः ?

रत्नाकरः—देव ! परिजना मे पापभागं न गृह्णन्ति । तैर्मम प्रार्थनं प्रत्याख्यातम् ।

ब्रह्मा—किं कथयसि ? परिजनास्त्वां निराकुर्व्वन्ति ? अहो ! कष्टकरमेतत् !

रत्नाकरः—महाभागाः ! पिता मे कष्टं नावगच्छति । जननी उदासीना । सापि विलाससहचरी सहधर्म्मिणी न मे दुःखमनुबुध्यते । [स्वगतम्] अहो, कथमत्र तिष्ठामि ? को हि मम परित्राणः ?

ब्रह्मा—रत्नाकर ! असारोऽयं संसारविलासः । सर्व्वमत्र स्वप्नकल्पम् । एतदर्थम् अज्ञाना एव असत्पथमनुवर्त्तमाना दुःखशतानि भुञ्जते ।

रत्नाकरः—देवाः ! अतीतानि दुष्कृतिशतानि मामहर्निशं दहन्ति । तन् कथ्यतां कृपया को मे निस्तारोपायः ।

नारदः—रत्नाकर ! एष भगवान् प्रजापतिरेव तव निस्तारं विधास्यति । तेनैवात्र अस्माकमागमनं भवति ।

रत्नाकरः—भगवन्तः ! अनुतप्तोऽहम् । तन्न पुनः पापमाचरिष्यामि । देवा यूयम् । [उपगम्य] एषोऽहं युवयोर्बन्धनमुन्मोचयामि । [उभयोर्ग्रन्थिं मोचयति] [पादयोः पतित्वा] क्षम्यतामपराधः । निस्तार्य्यतां पापी रत्नाकरः । [उच्चैर्विलपति]

नारदः [कराभ्यामुत्तोलयति]—स्वस्ति स्वस्ति । मा विषीद । शान्तिं ते कथयामि ।

[रत्नाकरो ब्रह्मणः पादयो. पतितः प्रार्थयते]

रत्नाकरः—देव ! कृपां विधेहि । नराधमं मामुद्धर ।

ब्रह्मा—च्यवनात्मज ! अधुना तवानुताप एव प्रायश्चित्तम् । तदुत्तिष्ठ, स्थिरो भव । [शिरसि हस्तं दत्वाशिषं करोति]

रत्नाकरः [उत्थाय एकैकं प्रति कृताञ्जलिः]—करुणामय ! करुणामय ।

ब्रह्मा [कमण्डलुजलं सिञ्चति]—श्रेयोऽस्तु । अपगच्छतु पापजातम् ।

नारदः—शृणु रत्नाकर ! तव परित्राणार्थं वयमिहागताः । तदलं विषादेन ।

रत्नाकरः—कृपामयाः, कृपामयाः । दैवतकरुणामन्तरेण को हि रत्नाकरं त्रास्यते ? एषोऽहमश्रुप्लुतो भवतां पादपद्ममाश्रये ।

ब्रह्मा [कमण्डलुमध्यात् सलिलमभिसिञ्चन्]—च्यवननन्दन ! एषा तेऽश्रुमालिका गङ्गाधारेव त्वां पवित्रयति । तेन विधूतकल्मषः पापहरं श्रीराम-नामोद्गायनं कुरु । जप, श्रीराम, श्रीराम !

रत्नाकरः—जय श्रीराम, जय श्रीराम !

नारदः [सहर्षम्]—साधु साधु । ननु एतदेव तव तपश्चरणम् । तद् आमुक्तेर्ध्यानस्तिमितलोचनः सानन्दं भगवन्नामसाधनं कुरु । ततो यथाकालं ते तपःसिद्धिर्भविष्यति । तदैवास्माकं पुनर्मेलनं भवेत् ।

[उभौ ब्रह्मानारदौ प्रस्थानं कुरुतः]

रत्नाकरः [उत्थाय]—जय राम, जय राम ।

[नेपथ्ये] नारदो गायति—

राम नारायणानन्त मुकुन्द मधुसूदन ।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥

इति चतुर्थोऽङ्कः

पञ्चमोऽङ्कः—रत्नाकरभवनम्

[कक्षमध्ये रत्नाकरपत्नी चिन्ताकुलोपविष्टा तिष्ठति ।]

अस्तिः [करतलविन्यस्तकपोला दीर्घं निःश्वस्य]—वृन्तोत्खातं दग्धजीवनं कथं धारयामि ? को वा बुध्यते मम मर्म्मवेदनाम् ! अशरणाहं वृथैव जीवामि !

[प्रविशति बालको रत्नभानुः । करे तस्य पिञ्जरबद्धः शुकशिशुः ।

रत्नभानुः—अम्ब, अम्ब !

अस्तिः—एहि प्रिय ! क्व गतोऽसि ? [उत्थाय तमुपानीय स्वाङ्के उपवेशयति]

रत्नभानुः—अम्ब ! एष शुकशावको न कूजति, न चालपति ।

अस्तिः—जात ! स्वाधीनोऽयं वनविहङ्गः । जननीक्रोडाद्विच्युतो दुःखेन खिद्यते । तेनायं मौनी तिष्ठति ।

रत्नभानुः—कथमेतत् ? अहमेनं सादरं पालयामि, ददामि चास्मै नीवार-कणान् । तथापि कथमयं शोचति ?

अस्तिः—वत्स ! मातृक्रोडमेव शिशूनामाश्रयस्थलम् । जनन्याः मुख-

कमलं विलोक्य तनयाः स्वर्गसुखमनुभवन्ति । अत्रासौ विहगो मातृसङ्गाद्वञ्चितो विषीदति ।

रत्नभानुः—किन्त्वहमेनं निर्झरजलैः स्नापयामि, तोषयामि च तण्डुल-कणसमेतवन्यफलदानेन । तत् कथमेष न प्रसीदति ?

अस्तिः—तात! यदि कोऽपि त्वामितोऽन्यत्र नयति, तदा किं ते सुखं भविष्यति ?

रत्नभानुः—कथमहमन्यत्र गच्छामि ? नाहं त्वया विरहितस्तिष्ठामि ।

अस्तिः—किन्तु, यदि त्वमिमं विहङ्गशिशुम् मातृसकाशे गमनार्थं न मुञ्चसि, तदाहमपि दूरं गमिष्यामि । त्वमत्र एकाकी स्थास्यसि ।

रत्नभानुः—क्षम्यतां मातः । नाहं तव वचनं लङ्घयिष्यामि । तन्मा त्वं दूरं गच्छ ।

अस्तिः—तर्हि मोचय शुकशावकम् । उन्मोचय पिञ्जरद्वारम्, येनायमुड्डीय नभसि विहरन् जनन्याः स्नेहाश्रयमाश्रयते ।

[रत्नभानुः उत्थाय पिञ्जरान्मोचयति पक्षिणम्, विहगश्च उड्डीय बहिर्गतः]

रत्नभानुः—गच्छ रे वनविहग! मातृसकाशम् । मोचयामि ते बन्धनम् ।

अस्तिः [सादरं पुत्रं वक्षसि निधाय चुम्बति मुखम्]—साधु साधु । चिरं जीव पुत्र! यथायं मुक्तविहङ्गस्तथैव त्वं चिरं मोदस्व ।

रत्नभानुः—मातः, अस्माकमाश्रमे मृगशावका विचरन्ति । नृत्यन्ति च तरुशाखासु मनोहरा मयूरश्रेणयः । एतद्दर्शनेन मे महानानन्दो जायते ।

अस्तिः—साधु । अहं ते सुन्दराणि क्रीडनकानि दास्यामि । तेनापि तव सन्तोषो भविष्यति ।

रत्नभानुः—अहो मधुरम् । किन्तु मातः, तातो मे अद्यापि नागच्छति । चिरमहं पितरं न पश्यामि ।

अस्तिः—[नतवदनाश्रु मुञ्चति ; सम्मार्ज्य नयनयुगम्] अहो भाग्यम्!

[दीर्घं निःश्वसिति] किमहं कथयामि ? [पुत्रं प्रति] वत्स ! मा त्वं विषीद । जनकस्ते यथाकालमागमिष्यति ।

रत्नभानुः—अहो आनन्दः, आनन्दः !

[प्रविशति च्यवनपत्नी स्वस्तिः]

स्वस्तिः—[प्रविश्य स्वगतम्] हा धिक् ! एषा शिशिरसिक्ता कमलिनीव पुत्रवधूः सविषादं तिष्ठति । [प्रकाशम्] जाते ! अत्र किं करोषि ? अहो, इत्थं निराभरणां त्वामवलोक्य नाहं शान्तिमाप्नोमि । तद् भद्रे ! आत्मानं मा पीडय ।

अस्तिः—[रुदती] अम्ब, अम्ब ! [अश्रुमार्जनां करोति]

रत्नभानुः—पितामहि ! दीयतां मे मोदकः । न कोऽपि मह्यं लड्डुकं ददाति !

स्वस्तिः—स्वस्ति पौत्र । नयनानन्दक ! एषाहं ते लड्डुकं ददामि । तदपेक्षस्व, आनयामि मोदकम् । [अभ्यन्तरं गच्छति]

रत्नभानुः—साधु पितामहि, साधु ।

स्वस्तिः—[प्रविश्य] गृहाण मोदकं प्रिय । अधुना सानन्दं भक्षय अभीष्टद्रव्यम् ।

रत्नभानुः—मुखेऽर्द्धं समर्प्य]—अहो मधुरं लड्डुकम्, मधुरम् । [नृत्यन् प्रस्थानं करोति]

स्वस्तिः—[स्वगतम्] चिरं जीवतु पौत्रः । [पुत्रवधूं प्रति] कल्याणि, अस्यैव कुलनन्दनस्य मुखदर्शनेन विसर्ज्यतां दुःखजातम् ।

अस्तिः—[अश्रूणि मार्ज्जयन्ती सोच्छ्वासम्] अम्ब ! भाग्यहीनाहं सर्व्वसौख्यवञ्चिता वृथा जीवामि । इदं व्यर्थजीवनव्यसनं दुःखाय भवति । [नयनयुगमाच्छादयति वस्त्राञ्चलेन ।]

स्वस्तिः—[सादरं पुत्रवधूमन्तिकमुपानीय] अलं खेदेन वत्से ! स्थिरा भव । धैर्यमुपेहि । नूनं वर्त्तिष्यते तव पत्युर्मङ्गलम् । [ऊर्द्ध्वं विलोक्य] नारायण, नारायण ! रक्ष पुत्रम् । रक्ष मे पुत्रवधूम् ।

[रत्नभानुविधृतकरश्च्यवनः प्रविशति]

रत्नभानुः—पितामहि ! एष पितामहपाद आगच्छति। अयमहं तमानयामि। [पितामहं प्रति] आर्य्य पितामह ! एषा पितामही जनन्या सह तिष्ठति।

च्यवनः—साधु, साधु। [पत्नीं प्रति] भोः, पौत्रस्ते मामानयति। [आगत्य उपविशति]

स्वस्तिः—[उत्थायाभिगम्य]—सुखम्, सुखम्। अधुना त्वं मोदस्व पौत्रेण।

च्यवनः—[स्वगतम्] नारायणः प्रसीदतु। [पौत्रं प्रति] तत् पौत्र, प्रार्थयस्व अभीष्टद्रव्यं पितामहीसकाशम्।

रत्नभानुः—आर्य्य ! एषा मे मोदकं दत्तवती। तत् भवानपि प्रयच्छतु मे क्रीडनकम्।

च्यवनः—नूनं पितामही तुभ्यं सर्व्वं वाञ्छितं प्रदास्यति। [पत्नीं प्रति] भोः दीयतां बालकाय क्रीडनद्रव्यम्।

स्वस्तिः—तदहं प्रदास्यामि। [रत्नभानुं प्रति] तात ! अलं प्रार्थनेन। अहं ते शकुन्तकं प्रदास्यामि, दास्यामि च दारुमयं मयूरं, काष्ठनिर्म्मितं मृगशावञ्च।

रत्नभानुः—अहो मधुरम्। अतोऽहं तपोवनाङ्गनेषु क्रीडारतान् मृगशिशून् अवलोकयिष्यामि। [नृत्यन् प्रस्थानं करोति]

च्यवनः—तत् कुत्रास्तेऽस्य जननी ? [पुत्रवधूमुद्दिश्य] जाते, कथं विरले तिष्ठसि ? एवमात्मानं मा त्वं पीडय विषादेन।

स्वस्तिः—[पुत्रवधूं प्रति] वत्से, आगच्छ। एष श्वशुरस्त्वामाह्वयति।

[अस्तिः समागत्य श्वशुरस्य पादवन्दनां करोति]

च्यवनः—स्वस्ति स्वस्ति। कल्याणि! भद्रं ते भवतु। अपगच्छन्तु च सर्व्वाण्यशुभानि। [आशिषं करोति]

स्वस्तिः—एषास्मत्पुत्रवधूः अपगतसर्व्वदुःखा राहुमुक्ता चन्द्रलेखेव विभातु। तदेनां तव स्नेहाशिषा तपोबलेन च श्रेयोमण्डितां विधेहि।

च्यवनः—किमेतत् पुनः कथनीयम्। इयं मे सुचरिता कुललक्ष्मीः पुत्रवधूः सर्व्वसौख्यसौभाग्यविमण्डिता पत्युरायुर्विवर्धिनो विलसतु। विराजतां चेयं भर्त्तुस्तपःसिद्धिसौख्यभागिनी कुलप्रदोपेनायुष्मता श्रीमता तनयेन।

स्वस्तिः—अहो सफलं भवतु ब्रह्मवाक्यम्। तदिमां विषादविधुरां सान्त्वयतु भवान् पुत्रवधूं शान्तिवचनेन।

च्यवनः—[पुत्रवधूं प्रति] भद्रे! मास्तु दुःखम्। आविर्भवतु ते महत् कल्याणं दुःखान्ते सर्व्वसौख्याय।

अस्तिः [सोच्छ्वासम्] तात! नाहमन्यत् जानामि! इत्थं दुःखानल-दग्धाहं प्रार्थये भवतामाशिषं—जीवनव्रतं मे परिपूर्णमस्तु परमार्थलाभेन, इयं मे अश्रुगङ्गाभिषिक्ता साधना श्रेयःसम्पदा पूर्णतां गच्छेदित्येव मे आकिञ्चनम् अहर्निशं निवेद्यते।

च्यवनः—स्वस्ति स्वस्ति, पुत्रि! मा त्वं विषीद। मास्तु ते दुःखजातम्। नूनं सर्व्वमङ्गलमयो विश्वविधाता त्वां पूर्णमनोरथां करिष्यति।

अस्तिः [श्वश्रोश्वरणवन्दनां करोति]—तात! आशिषं देहि मे। [स्वस्तिं प्रति] मातस्तव चरणपद्ममेव मम शरणम्।

स्वस्तिः—कल्याणि! विजयस्व पतिगौरवेण। नूनं ते पुण्यतपसः श्वशुरस्य तपःफलं प्राकाम्येन तव मनोरथसिद्धिं जनयिष्यति। तदेहि! अधुना गृहधर्म्मसाधने प्रवृत्ता भवेम। [प्रस्थानं करोति। अस्तिश्च तामनुगच्छति]

च्यवनः—आत्मा वै जायते पुत्रः। तदहमपि रत्नाकरस्य कल्याणार्थं परमार्थकर्म्मणि आत्मानं नियोजयामि। जयतु नारायणः। धर्म्मो नः प्रसीदतु।

षष्ठोऽङ्कः

[ग्राम्यपथः—तरुमूले पिङ्गलाक्ष उपविष्टस्तिष्ठति]

पिङ्गलाक्षः—[स्वगतम्] रत्नाकरस्तपस्यार्थं वनं गतः। जीविकाहीनश्चाहम्। तदधुना किं करिष्यामि ?

[प्रविशति चण्डकेशः।]

चण्डकेशः—[पिङ्गलाक्षं प्रति] भोः पिङ्गलाक्ष !

पिङ्गलाक्षः—(प्रोत्फुल्लः) अरे चण्डकेश ! आगच्छ, आगच्छ। बहुदिनेभ्यः परं त्वां पश्यामि। इह उपविश, उपविश।

चण्डकेशः—अथ किम्। तत् त्वमपि अत्र किं करोषि ? त्वं खलु चिन्ताकुल इव दृश्यसे। [उपविशति] को व्यापारः ?

पिङ्गलाक्षः—भ्रातः सत्यं कथयसि। अस्माकमतिदुर्दिनमुपस्थितम्। नास्ति अर्थलेशः। बान्धवाश्च तिरोहिताः। तेन नितरां सीदामि।

चण्डकेशः—अलं बाहुल्येन। अहमपि निरुपायस्तिष्ठामि। नास्ति जीवनरक्षणोपायः। तत्, का चावस्था तव परिजनानाम् ?

पिङ्गलाक्षः—भ्रातः किं वक्ष्यामि ? सपरिजनः क्षयमापन्नोऽस्मि।

चण्डकेशः—तदधुना क उपायः ? एवमर्धाहारेण, अनशनेन कथं जीविष्यामि ?

पिङ्गलाक्षः—[दीर्घं निःश्वस्य] रत्नाकरेऽन्तर्हिते वयमपि प्रणष्टाः। न पश्यामः प्रतिकारम्।

चण्डकेशः—अहो, धिगस्तु अस्मज्जीवितम्। परिजना-नूनं पञ्चत्वमाप्स्यन्ति। तत् कथमेतेषां बुभुक्षापीडितानां परिजनानां प्राणरक्षां विधास्यामि ?

पिङ्गलाक्षः—भोः, अधुना आत्मरक्षणमेव दुष्करम्। किं च स्नेहविहीनाः परिजना अधुना ममासहायतामक्षमत्वं च परिदृश्य विरुद्धाः सञ्जाताः।

चण्डकेशः—अरे, सत्यं सत्यम्। निरुद्धजीविकस्य ममापि नास्ति गृहे स्थानम्। सर्वेऽधुना अनादराः सञ्जाताः।

पिङ्गलाक्षः - अहो स्वार्थमयः संसारः। एतदेव सत्यमवगच्छामि। भार्य्या मे रोषकुटिला सदैव नागीव विषमुद्वमति। नास्ति तत्सकाशेऽपि मम स्थानम्। किञ्च—[इति विरमति]

चण्डकेशः—सापि निष्ठुरमाचरति?

पिङ्गलाक्षः—अथ किम्। सापि अधुना करुणाहीना।

चण्डकेशः—किं कथयसि? दुःसमये भार्य्यैव सहायः। सापि ते प्रतिकूला?

पिङ्गलाक्षः—भ्रातः, पश्य मेऽङ्गानि। [उत्तरीयमुन्मोच्य पृष्ठं दर्शयति] अर्थोपार्जनं न करोमीति कुपिता पत्नी मां निर्दयं प्रहरति।

चण्डकेशः—[निरीक्ष्य] अहो कष्टम्! सर्वाङ्गेषु दृश्यन्ते प्रहारचिह्नानि। किन्तु भार्य्या रुष्टा भर्तारं प्रहरतीति न कुत्रापि दृष्टः श्रुतो वा एवंविधो व्यतिकरः।

पिङ्गलाक्षः—तद् भ्रातः, अधुनाऽलं मे जीवनधारणेन। एषोऽहं वृथा जीवामि। अधुना मरणमेव मे श्रेयस्करम्।

चण्डकेशः—अहो, विडम्बनं विडम्बनम्। नूनं मूर्खया भार्य्यया सहावस्थानं वनवासादपि दुःखप्रदम्। पश्यामि—भाग्यहीनानां यथारण्यं तथा गृहम्। [विमृशन् निःश्वस्य] न जाने, ममापि का गतिर्भविष्यतीति।

पिङ्गलाक्षः—भ्रातः, बान्धवा मां त्यजन्ति। सर्वेषामहं घृणाभाजनम्। यतो मे पुनरुपार्जनं नास्ति।

चण्डकेशः—किं वैचित्र्यम्? यावद् वित्तोपार्जनशक्तस्तावत् स्वजनश्चानुरक्तः। किन्तु साम्प्रतं किं करिष्यसि?

पिङ्गलाक्षः—नाहं गृहे स्थास्यामि, न वा तत्र गमिष्यामि। एवं लाञ्छितः कथं प्रतिवेशिभ्यो मुखं दर्शयिष्यामि?

चण्डकेशः—भ्रातर्विषादं मा गच्छ। पत्नी ते न पुनः प्रतिकूलमाचरिष्यति। अहं तां हितं बोधयिष्यामि।

पिङ्गलाक्षः—नहि नहि। न खलु विश्वसनीयो नारीजनः। दुग्धकदलीदानेन फणिनी तुष्यति; रुष्टा तु फणामुत्तोल्य दशति। इयं हि संसारनीतिः।

चण्डकेशः—मया तु ज्ञायते, स्वभावकोमला नारीति। किन्तु अङ्गेषु ते प्रहारचिह्नान्यवलोक्य संसारस्वरूपं विचिन्तयन् विमुह्यामि।

पिङ्गलाक्षः—भ्रातः, परिहर मोहम्। न खलु अनशनक्षीणाः परिजनाः पुष्पचन्दनैस्त्वाम् अर्चयिष्यन्ति। ते हि स्वार्थानुरोधात् प्रियमाचरन्ति। क्षुणो च स्वार्थे निष्करुणा भवन्ति।

चण्डकेशः—सर्वं बुध्यते। उपार्जनहीनानां गृहवासो विडम्बनम्।

पिङ्गलाक्षः—अथकिम्। अर्थ एव समादरकारणम्। किं च धनेन हीने जने परिशुष्यति प्रणयः, विलुम्पति समादरः, मानश्च विलयं गच्छति।

चण्डकेशः—तत्, क्व यास्यामः? किं वाधुना कर्त्तव्यम्?

पिङ्गलाक्षः—दूरदेशोऽस्माभिर्गन्तव्यः।

चण्डकेशः—दूरदेशे किं करिष्यसि? केनोपायेन वा तत्र जीविष्यसि?

पिङ्गलाक्षः—तत्र कामपि वृत्तिं दास्यवृत्तिं वावलम्ब्य जीवनं धारयिष्यामि।

चण्डकेशः—अस्त्येष उपायः। किन्तु विदेशे स्वजनविच्छेदो हृदयं पीड़यति, परिजनानां कृते च चिन्तानलो मानसं दहति,—एतदेव विचारणीयम्।

पिङ्गलाक्षः—एतदपि सत्यम्। किन्तु अलीके संसारे स्वयमनशनक्लिष्टस्य मे परिजनमायया देहक्षयेण किं प्रयोजनम्?

चण्डकेशः—बाढ़म्। किन्तु को वा उपायः? वयं तु विद्याहीनाः, न वा विचक्षणाः। तेन विदेशेऽपि न भवेत् सुलभः कर्मलाभः। अतस्तत्रापि दुःखम्।

पिङ्गलाक्षः—तर्हि, निरस्तोऽस्तु विदेशगमनसङ्कल्पः। वनान्तरं गमिष्यामः। तत्र सन्न्यासवृत्तिमवलम्ब्य गहनशैलकन्दरे वनजातफलमूलादिना उदरं पूरयित्वा स्वच्छन्दसुखनिद्रया निखिलदुःखं विस्मरामः।

चण्डकेशः—भो, दुष्करं वैराग्यसाधनम्। न हि तदपि सुखप्रदम्। यतः क्षुधा तृष्णा अटनपरिश्रमश्च प्रबलं क्लेशमुत्पादयिष्यन्ति। अन्तश्च स्वजन-विच्छेददुःखं हृदयं पीड़यिष्यति।

पिङ्गलाक्षः—[विचिन्त्य] तर्हि किं करणीयम्? चिन्तय उपायम्।

चण्डकेशः—[निःश्वस्य] रत्नाकरे प्रस्थिते समुत्थित एष समस्यानिवहः। भोः पिङ्गलाक्ष, दृष्ट उपायः। अधुना कृषिकार्य्यमवलम्बितव्यम्। नूनं श्रमेण लक्ष्मीं प्रसादयिष्यामः। श्रुतञ्च—'वाणिज्ये वसते लक्ष्मीस्तदर्द्धं कृषिकर्म्मणी'ति। एष एव गृहवासदुःखस्य स्वजनविरहस्य च प्रतिकारः।

पिङ्गलाक्षः—अहो, निरस्तं तावद् वैराग्यसाधनम्। अधुना कृषि-कर्मणान्नसंस्थानं विधाय गृहलक्ष्याः प्रसादनमेव श्रेयस्करम्।

चण्डकेशः—[सोल्लासम्] साधु साधु। तदेव भवतु। भवतु पुनर्भाग्य-परीक्षणम्। किञ्च गार्हस्थ्याश्रम एव अवलम्बनीयः। यतो भार्य्यया विच्छेदोऽसहनीयः। अतश्चल चल गृहम्।

पिङ्गलाक्षः—अहो, पुनर्गृहं प्रत्यावर्त्तितव्यम्? तत्, चल, चल। मधुसूदन—मधुसूदन!

इति षष्ठोऽङ्कः

सप्तमोऽङ्कः

[पुष्पिता वनभूमिः—प्रविशतो माधवी सुनन्दा चेति नाम्न्यौ पुष्पभाजन-करे वनबालिके। उभे गायतः। कोकिलाः कूजन्ति।]

गानम्

कुसुमकानने ध्वनति मधुरं प्रेममधुरवीणा,
कोकिलकाकलीमुखरा धरणी लसति पुलकलीना ।
विकसति मधुमल्ली,—
सुरभिमलयः प्रवाति मधुरं नृत्यति वनवल्ली—
आगतो मधुमासः,—
सखि स्फुरितसुखहास आगतो मधुमासः,—
गगने भुवने पवने पवने नयने सुखविलासः,—
कनककिरणैर्हसति धरणी विषादतिमिरहीना ॥

माधवी—सखि, नयनाभिरामां वनशोभां पश्य । एषा कुसुमभारावनता वनभूमिर्वसन्तसमागमे पुष्पसम्भारैः ऋतुराजं संवर्द्धयति ।

सुनन्दा—अथ किम् । श्यामलं काननं विहङ्गसङ्गीतैर्मुखरीभवति ।

[विहगकूजनम्]

नेपथ्ये मञ्जरिका—कु—उ, कु—उ [इति विहगकूजनमनुकरोति]

सुनन्दा—[सहर्षम्] कु—उ, कु—उ [पक्षिरवानुकारेण प्रत्युत्तरं ददाति]

माधवी—[उच्चैः] मञ्जरिके, आगच्छ आगच्छ ।

सुनन्दा—[उच्चैः] प्रियसखि, अधुना आत्मानं प्रकाशय ।

[कुहुध्वनिपूर्व्वकं प्रविशति मञ्जरिका]

मञ्जरिका—कु—उ । कु—उ ।

माधवी—आगम्यतां भद्रे । वयं त्वां प्रतीक्षामहे ।

मञ्जरिका—अहो सुखम् । तत् हले, अत्र किं क्रियते ?

माधवी—सखि, एष मधुमासः समागतः । तेन कालोचितं विहरामः ।

सुनन्दा—वयं वसन्तोत्सवं पालयामः ।

मञ्जरिका—अहो मधुरम्। इह वसन्तागमेन चूतमुकुलानि विकसन्ति। तेन मधुपगुञ्जनसनाथं विहगकूजनं हृदयमुन्मादयति।

[प्रविशति वनतोषिणी]

वनतोषिणी—[प्रविश्य] प्रियसख्यः, क्व गता यूयम्? एषाहं युष्माननुसृत्य परिक्लान्ता भवामि।

माधवी—हले, नास्ति भयम्। तदेहि। इमां वनशोभामवलोकय।

वनतोषिणी—अपूर्वमपूर्वम्! एषा वासन्ती वनशोभा मनो हरति।

माधवी—सखि, तदद्य ऋतुराजं संवर्द्धयामः।

वनतोषिणी—सुनन्दे—[समस्वरेण] उत्तमम्—उत्तमम्।

माधवी—तेनैव यूयं प्रिया भवथ। अतः आनन्दः क्रियताम्।

मञ्जरिका—तर्हि किमस्माभिः करणीयम्?

वनतोषिणी—[मञ्जरिकां प्रति] हले, अनया प्रियसख्या वसन्तोत्सवः सङ्कल्पितः। तद् वयं तमेव उद्यापयामः। [माधवीं निर्दिशति]

माधवी—साधु साधु। अत्र वकुलवीथिकायामुपविश्य ऋतुराजसंवर्द्धनार्थमर्घ्यं रचयामः। [तथा करोति]

मञ्जरिका—अहो आनन्दः। अद्य पुष्पितास्तरुशाखा मञ्जुलमलयहिल्लोलेन नृत्यन्ति। तद् वयमपि आनन्दं करिष्यामः।

वनतोषिणी—सखि, त्वमत्र वकुलाशोकचम्पकादिकुसुमैर्मङ्गलद्रव्यं विरचय। अहमपि चूतमुकुलानि समाहृत्य आनयामि। [प्रस्थानं करोति]

माधवी—साधु साधु। त्वर्य्यताम्। अद्य मानसं मे उल्लसति। [मञ्जरिकां प्रति] हला, अचिरादेवेह देवो समागमिष्यति। तत् त्वयापि यथोचितं साध्यताम्।

मञ्जरिका—अयि, साधयामि तावत्। एषाहं त्वरयामि। [प्रस्थानं करोति]

[नेपथ्ये मधुपगुञ्जनं विहगरवश्च। वनतोषिण्या सह माधवी कुसुम-भाजनकरा प्रविशति। गायतश्च उभे मृदुस्वरेण।]

उभे—[गीतिस्वरेण] मधुरं मधुरम्—मधुमासे सखि निखिलं मधुरम्।

माधवी—गीतं मधुरं, भूषणं मधुरम्। [गीतमनुकरोति]

मञ्जरिका—वचनं मधुरं—नयनं मधुरम्। [तदेवानुगायति]

सर्व्वाः—[समस्वरेण गीतानुकारेण] हृदयं मधुरं—निखिलं मधुरम्।

[नेपथ्ये दूरतो रत्नाकरो गायति—जय राम, जय राम।] [प्रविशति च वनलक्ष्मीः।]

वनलक्ष्मीः—[प्रविश्य] अये, मधुगन्धवासिते तालतमालगहने वनान्तराले दूरतः कोऽयं गायति ? वसुन्धरायां अन्तस्तलादिव समुत्थितेयं दिव्यगीतिः कर्णेषु मधुधारां वर्षति।

माधवी—[उपसृत्य] स्वागतं वनलक्ष्म्याः। देवि, संवर्द्धयामो भवतीम्।

मञ्जरिका-वनतोषिण्यौ—[उपसृत्य] जयोऽस्तु देव्याः। स्वागतं त्वां ज्ञापयामः।

सुनन्दा—देवि, स्वागतं ते।

वनलक्ष्मीः—वर्द्धन्ताम् प्रियसख्यः। प्रमोदध्वम् आनन्दभरेण।

माधवी—विजयतां देवी। भगवति, उल्लसिता वयं वसन्तसमागमेन।

सर्वाः—भवत्याः शुभागमनमस्माकमानन्दं वर्द्धयति।

वनलक्ष्मीः—साधु। अथ किमत्र क्रियते भवतीभिः ?

माधवी—देवि, समागतो मधुमासः। कुञ्जे कुञ्जे च गुञ्जन्ति मधुकराः। तेन वयम् ऋतुराजमर्चयिष्यामः।

वनलक्ष्मीः—उत्तमः प्रस्तावः, तद् आयोजनं क्रियताम्।

सुनन्दा—देवि, एष विरचितोऽस्माभिरर्घ्यसम्भारः। [पुष्पसम्भारादिकं पुरतः स्थापयति]

मञ्जरिका—मयापि समाहृतानि मङ्गलद्रव्याणि। एताश्च पुष्पमालिकाः विरचिता माधवार्चनाय। [पुरतः संस्थाप्य प्रदर्शयति]

वनलक्ष्मीः—साधु साधु। अथ वनतोषिणी किं करोति? [वनतोषिणीं प्रति] हले, त्वया किं क्रियते?

वनतोषिणी—देवि, एतानि मधुगन्धीनि पुन्नागपलाशकुसुमानि संचीयन्ते। समाहृतानि च सरसीसलिलादिमानि पद्मपुष्पाणि।

वनलक्ष्मीः—अहो सुखम्। सर्वथानन्दकरोऽयं वसन्तकालः सञ्जीवनो जीवनरसस्य। तद् वयमद्य सानन्दं मधुमासोत्सवम् उद्यापयामः।

सर्वाः—[सोल्लासम्] अहो जयतु देवी। देवि, तदागम्यतामिह अशोकतरुसकाशं माधवार्चनाय। [सर्वा अग्रतो गच्छन्ति]

वनलक्ष्मीः—[उपसृत्य] साधु। एषाहमागच्छामि।

[सखीजनानुगता अशोकतरुतलमुपस्थाय वेदिकाग्रतो नतजानुरुपविशति पुष्पालङ्कृतवेदिकाग्रे सख्यो धूपदीपार्घ्यादिकमर्चनासम्भारं पात्रे स्थापयन्ति, वन्दन्ते च कृताञ्जलय आलिम्पनालङ्कृतवेदिं पुरतः। वनलक्ष्मीर्माधवमर्चयति।]

वनलक्ष्मीः—[कृताञ्जलिः] स्वागतम् ऋतुराजस्य। माधव, एता वयं पुष्पार्घ्यैर्भवन्तमर्चयामः। गृहाण चेमं मलयजचर्चितमर्घ्योपहारम्। [अर्घ्यमालिकादि न्यस्यति]

सख्यः—जयतु माधवः। नमोऽस्तु कुसुमाकराय। [प्रणमन्ति]

वनलक्ष्मीः—सख्यः, अस्मिन्नानन्दोत्सवे सम्पूज्यतां मधुनाथो नृत्यगीतोपायनेन।

माधवी—देवि, अद्य वसन्तोत्सवप्रसङ्गेन मूर्त्तिमतीं वसन्तलक्ष्मीं त्वां समर्चयितुमभिलषामः। तदत्र वेदिकायामुपविश्य गृह्यतां नो नृत्यगीतमधुरं विजयाभिनन्दनम्।

वनलक्ष्मीः—[उपविशति] वर्द्धध्वं प्रियसख्यः। सुखमस्तु भद्राणाम्।

[बालिका नृत्यगीतं कुर्व्वन्ति]

गानम्

मधुमञ्जरी मधुमञ्जरी भुवनमनोहारिणी,
मलयानिल-चञ्चलदल-कुसुमकुञ्जचारिणी।
चूत-मुकुल-पुष्पकुन्तला
लसति स्वप्नमयी ललितस्मितोज्ज्वला
नूपुरशिञ्जन-गीतिविमोहन-जीवनरसदायिनी।
नयनमोहन-रूपशोभन-कुसुमभूषणधारिणी,
अमलकमलमालिनी जयति वनवासिनी॥

इति सप्तमोऽङ्कः

अष्टमोऽङ्कः

[वनपथे ब्रह्मनारदौ विचरतः।
नारदो गायति, ब्रह्मा च तमनुगच्छति।]

नारदः—[गायन् प्रविशति]

राम नारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन॥

[नेपथ्ये रत्नाकरः—जय राम जय राम।]

ब्रह्मा—देवर्षे, अत्र निभृतकुञ्जान्तराले रत्नाकरस्तपस्यति। तस्य कण्ठोच्चारितं सुधामधुरं रामनाम निर्जनां वनभूमिं मुखरीकरोति।

नारदः—अथ किम्। रत्नाकरस्य महद् भाग्यं यदस्य कृच्छ्रसाधनं सिद्धिं गच्छति। तथाहि एतत् पुण्यकण्ठोद्गीत-रामनामश्रवणेन हृदयं मे उन्मादयति।

ब्रह्मा—जयति भुवनमङ्गलं रामनाम। तस्यैव महिम्ना रत्नाकरः तपःसिद्धः पूर्णतां गच्छति।

[पुनर्नेपथ्ये रत्नाकरः—जय राम, जय श्रीराम।]

नारदः—अहो, अमृतरसायनं भगवन्नाम जयति। तत् प्रजापते, तपस्विनः पुण्यव्रतमद्य समाप्तिं गच्छति।

ब्रह्मा—किं पुनर्वक्तव्यम्? आत्मारामं महर्षिमधुना योगासनादुत्तोलयामि। नातःपरं तस्य साधनमस्ति।

नारदः [कुञ्जपार्श्वं गत्वा]—अहो, एष ध्यानमग्नो महातपस्वी वल्मीकव्यूहावृतोऽविरामं श्रीरामनाम जपति।

ब्रह्मा [उपगम्य रत्नाकरस्य करौ धृत्वा]—उत्तिष्ठ ब्रह्मन्। परिहर योग-समाधिं जगतां कल्याणाय।

नारदः [उपगम्य तमुद्दिश्य]—उत्तिष्ठ रत्नाकर। अश्रुधाराभिषिक्तं ते कृच्छ्रसाधनं पूर्णतां गच्छति।

ब्रह्मा—[नारदं प्रति]—देवर्षे, आगच्छ। आशीर्वचसा एनं संवर्द्धयामः। तत् संवर्द्धय तापसम्।

नारदः—[ब्रह्माणमुद्दिश्य]—जयतु प्रजापतिः। भगवन्, मनोरथं ते पूरयामि। [वाल्मीकिसमीपं गत्वा] महर्षे, त्यज योगासनम्। ध्यान-मुक्तोऽधुना राहुमुक्तो निशाकर इव पवित्रय भूतलं पुण्यकिरणपातेन।

[रत्नाकरः समुत्तिष्ठति, गायति युक्तकरः—जय राम—जय श्रीराम।]

ब्रह्मा—[रत्नाकरं प्रति]—ब्रह्मन्, पूर्णमस्तु तव व्रतम्। अलौकिकीयं महातपस्या। एषा खलु अग्निशोधितं काञ्चनमिव त्वां पुण्यतेजसा सन्दीपयति।

नारदः—[स्वगतम्] अहो तपोमाहात्म्यम्। येनायममृतत्वं गच्छति।

ब्रह्मा—[वाल्मीकिं प्रति] भो महायोगिन्, एवमश्रुमन्दाकिन्याम् अभिषिक्तो भवान् तपःसिद्धिं गच्छति। तेन तीर्णव्रतः शुद्धसत्त्वो भवान् आनन्दमयः परमात्मनि मोदते। अतो भवन्तमभिनन्दयामि।

नारदः—जयोऽस्तु महर्षे। अद्य तावन्नवजन्मपरिग्रहेणैव तव तपः-साफल्येन त्रिभुवनं नन्दते।

ब्रह्मा—ऋषे, एवं वल्मीकव्यूहादुत्थितो योगसिद्धो भवान् विजयताम्। अतःपरं ते वाल्मीकिरिति नाम ख्यातं भविष्यति। परं सच्चिदानन्दानुध्यान-निरतो भवान् अमृतमयं ब्रह्मविज्ञानं जगतां मङ्गलाय वितरतु।

रत्नाकरः—[कृताञ्जलिः] धन्योऽस्मि देव भवतां करुणालाभेन। अहं हि मलिनात्मा काचखण्ड इव त्रिलोकपावनानां भवादृशां कारुण्यमणेः स्पर्शलाभेन कृतार्थीकृतः। अतो वन्दे युष्मच्चरणकमलयुग्ममानन्देन।

[ब्रह्मनारदौ प्रणमतः]

ब्रह्मनारदौ—स्वस्ति स्वस्ति।

ब्रह्मा—अनेन हि युगान्तकारिणा तपःसाधनेन भवान् अमृतत्वं गच्छति। परिमण्डयति चैतत् तपःसाफल्यं भवन्तं दिव्यसम्पत्-समुच्चयेन। तत् परिपूर्णमस्माकं मर्त्यावतरणं भवतो मुक्तिलाभेन।

नारदः—जयतु जयतु वाल्मीकिः।

ब्रह्मा—विजयतां महामुनिर्वाल्मीकिः। महर्षे, अद्य प्रभृति सर्वे विश्व-वासिनस्तव जयगौरवं घोषयिष्यन्ति, प्रचारयिष्यन्ति च निखिलभक्तास्तव महिम्ना श्रीरामनाममाहात्म्यमानन्देन।

नारदः—[सानन्दं नृत्यन् गायति]

गानम्

पतितपावनं कुरु नाम शरणं रामनाम मनोहारि,
श्रीरामनाम जपाविरामं त्रितापदहनकारि।
श्रीराममन्त्रः सुधासारः
प्राणाभिरामः कण्ठहारः
करोति चित्तं कलुषमुक्तम् आनन्दसिन्धुविहारि।
मानसतमोहारि,—
शमनबन्धविदारि—भवबन्धनदुःखहारि॥

जयतु जयतु रामनाम
गाय रे नाम मुक्तकाम
भज मानस श्रीराम सुरसं नरकभीतिनिवारि,
गरलदहनकारि मम हृदयकमलचारि ।

इति अष्टमोऽङ्कः

नवमोऽङ्कः

[तमसातीरवर्त्तिनी वनभूमिः—विहङ्गा कूजन्ति—प्रवहति पार्श्वतः कल्लोलमुखरा तटिनी, प्रविशति वनं धनुर्बाणतूणाधारकरो निषादः ।]

निषादः—[सञ्चरन्]—अस्मिन् गहने वने सूर्य्यालोको न प्रविशति । न चात्र विलसति बहिर्विश्वेषां कोलाहलः । तेनैव वनचराणामेतन्निःशङ्क-विहारस्थानम् । यातु, पश्यामि तावत् । [पार्श्वदेशं गच्छति]

[प्रविशतः अनुचरौ]

प्रथमोऽनुचरः—अहो, सुगहनमरण्यम् । पक्षिणश्चात्र सानन्दं विहरन्ति ।

द्वितीयोऽनुचरः—नूनं श्वापदानाञ्चेयं सुखविहारभूमिः ।

प्रथमोऽनुचरः—अरे किं व्याघ्रा दृष्टाः ? वन्यवराहा वृकाश्चित्रका उत वा वन्यमहिषाः ?

द्वितीयोऽनुचरः—नहि नहि रे, प्राणिनोऽधुना न वहिर्विचरिष्यन्ति ।

प्रथमोऽनुचरः—कथमेतत् ? किं ते मानुषाद् बिभ्यति ?

द्वितीयोऽनुचरः—नूनं निःसंशयमत्र कारणम् । नररक्तलोलुपा अपि मरणभीतास्ते सावधाना विचरन्ति ।

प्रथमोऽनुचरः—सत्यम् । मानुषादपि श्वापदा विनाशभयमापद्यन्ते ।

द्वितीयोऽनुचरः—पश्यामि तावदेकेनैव बाणाघातेन पञ्चत्वं प्रापयिष्यामि पशुम् । यातु, अधुना निरर्थका पशुमारणकल्पना । अनुसन्धेहि पतत्रिणः ।

प्रथमोऽनुचरः—प्रेक्ष्यामि सखे, द्रक्ष्यामि रुचिरविहङ्गमान् । असन्नाथाय पक्षिमांसं रोचते । तत् खेचरशावका एव अस्माकं लक्ष्यविषयाः ।

द्वितीयोऽनुचरः—साधु साधु । अग्रतो गच्छ । प्राप्स्यन्ते बहवो विहङ्गाः ।

प्रथमोऽनुचरः—मृगयामि तावत् । अरे इत आगच्छ । पश्य पश्य मनोहरं खगम् ।

[उभौ अग्रतो गच्छतः—पुर आगच्छति च निषादः ।]

निषादः—अरे रे अनुचराः, किं दृष्टा विहङ्गमाः ?

प्रथमोऽनुचरः—बाढम् स्वामिन् । सुनिपुणं मृगयामः ।

निषादः—साधु । आगम्यतामिह तावत् ।

द्वितीयोऽनुचरः—स्वामिन् पश्य पश्य । एको नीलकण्ठविहगस्तिष्ठति ।

[अङ्गुलीनिर्देशं करोति]

प्रथमोऽनुचरः [अङ्गुलीनिर्देशं कृत्वा]—अहो, आनीलतमालशाखायां निभृतं सन्तिष्ठते चासौ ।

निषादः—[उपसृत्य] क्वासौ क्वासौ विहङ्गमः ? [साग्रहं निरीक्ष्य] आम्, दृष्टो दृष्टः । लोभनीयश्चायम् । [अनुचरौ प्रति] अन्विष्यतां भो योग्यस्थानं यत्र निभृतमवस्थाय बाणक्षेपः क्रियेत ।

प्रथमोऽनुचरः—प्रभो साधयामि तावत् । [द्वितीयानुचरं प्रति] रे लोहिताक्ष, त्वमितः सम्मुखदेशमुपगम्य अन्तरालात् सहायतां विधेहि ।

निषादः—अथ किम् । अरे त्वं यथायथं गत्वा सुनिपुणं रक्ष पक्षिणम् ।

द्वितीयोऽनुचरः—यथादिशति प्रभुः [पुरतोऽन्तरालं गच्छति]

प्रथमोऽनुचरः—[कतिचित्पदानि गत्वा] प्राप्तमिदमुपयुक्तस्थानम्। अत्र पल्लवघनकुञ्जतले निभृतमवस्थाय लक्ष्यस्थिरतां विधेहि नाथ।

निषादः—[पार्श्वदेशं गत्वा] मौनमातिष्ठ, निःशब्दं तिष्ठ। नोचेदुड्डीय प्रचलिष्यत्यसौ।

प्रथमोऽनुचरः—[सुनिपुणमभिलक्ष्य धनुषि शरं योजयति। बाणयोजना-शब्द उत्तिष्ठति]—तथास्तु तथास्तु, अनुपालयामि तावत्।

[सपदि सन्त्रस्ता विहङ्गा उड्डीय प्रचलन्ति—श्रूयन्ते च पक्षसञ्चालनशब्दाः]

निषादः—हा हा, पलायन्ते विहङ्गाः। सर्वे चोर्द्ध्वमुड्डयन्ते। तद् भोः, अधुनानुसर माम्। किञ्चित्पार्श्वमागच्छ।

प्रथमोऽनुचरः—अनु पालयामि तावत्। [उभौ सम्यगन्तरालं गच्छतः]

[पुनः प्रविशति सानुचरो निषादः]

निषादः—अहो, आयासकरं वृत्तम्। अथ तावत् पक्षिणस्त्रासविह्वलाः, अतश्चञ्चला दृश्यन्ते।

प्रथमोऽनुचरः—[पुर ऊर्द्ध्वं निरीक्ष्य सहर्षम्] प्रभो, दृश्यतां दृश्यताम्। अदूरत आनीलपल्लवच्छायायां क्रीडति क्रौञ्चमिथुनम्। तौ हि संक्रीडेते तमालशाखायाम्। [अङ्गुल्या निर्दिशति]

निषादः—[सहर्षम्] अहो, नयनाभिरामं विहगमिथुनम्। मरकत-श्यामलमिदं पक्षिमिथुनम् इन्द्रनीलमणेर्द्युतिच्छटामनुकरोति। विराजते चानयोश्चञ्चुपुटाग्रे पद्मरागानुकारिणी आरक्तवर्णच्छटा। किञ्च, एतयोः पक्षच्छदेषु तारागणमण्डितां नीलाम्बरद्युतिमाधुरीं विलोक्य शरासने बाणारोपणार्थं नाहमुत्सहे।

[प्रविशति द्वितीयोऽनुचरः]

द्वितीयोऽनुचरः—प्रभो, त्वर्य्यताम्, त्वर्य्यताम्। धनुषि समारोप्यतां बाणः।

प्रथमोऽनुचरः—अहो ! साधु साधु ।

निषादः—भोः, कथमेतन्मनोहरपक्षिमिथुनं विनाशयामि ? अनयोरानन्दोल्लासं विलोकयतो मम करयुगं बाणक्षेपणार्थं न प्रसरति ।

प्रथमोऽनुचरः—प्रभो, मृगयार्थमागतोऽसि । तेन नहि युज्यते स्वधर्मपालने तव औदासीन्यम् ।

द्वितीयोऽनुचरः—सम्यगाहैषः । स्वामिन्, मृगयाव्यसनिनो वयं स्वकर्मनिरताः, न हि दोषस्थानमिदम् ।

निषादः—अरे, स्वभावोल्लसितस्य क्रौञ्चमिथुनस्य सुखशान्तिमयी जीवनयात्रा मां करुणाया विह्वलीकरोति । तत् कथमेतस्य निरपराधस्य प्राणिनः प्राणहन्ता भविष्यामि ?

प्रथमोऽनुचरः—स्वामिन्, निषादा वयम् । पशुपक्षिमारणमेव अस्मत्कुलधर्म्मः । तत् कथं स्वकीयवृत्तिस्त्यज्यते ?

द्वितीयोऽनुचरः—न हि त्यज्यते कुलधर्म्मः । मृगया खलु अस्माकं स्वभाववृत्तिः ।

निषादः—तथास्तु । सम्यगुच्यते त्वया । अधुना स्वकुलोचितां वृत्तिमनुपालयिष्यामि । [प्रथमजनं प्रति] भोः, त्वमत्र तिष्ठ । पृष्ठतो वाणं मे कराग्रे निवेशय ।

प्रथमोऽनुचरः—तथास्तु । आदेशं ते पालयिष्यामि । [तूणीराद वाणोन्मोचनं नाटयति]

निषादः—[द्वितीयजनं प्रति] अरे चण्डनासिक, त्वममुत्र कुञ्जान्तराले आत्मानं गोपायित्वा यथायथं सहायतां कुरु ।

द्वितीयोऽनुचरः—एषोऽहं गच्छामि । [प्रस्थानं करोति]

निषादः—यातु । पश्यामि भाग्यम् । चण्डिके, मयि प्रसीद ।

इति नवमोऽङ्कः

दशमोऽङ्कः

[वनभूमिः—प्रविशति निषादः—अन्तराले च दूरतः पक्षिकूजनम्]

निषादः—तद्धि नयनमोहनं कामचर-विहगमिथुनम्। परमलोभनीये चैतत्पक्षिमिथुने संप्राप्ते अन्यर्थो मम बाणप्रयोगः सफलो भविष्यति। तन्नाहं प्रतिनिवर्त्तिष्ये। [सावधानं सञ्चरति]।

प्रविश्य प्रथमोऽनुचरः—नाथ, नाथ—तद्विहगमिथुनं पुनरुड्डीयागत्य निभृतपल्लवान्तराले तिष्ठति। तद् अविलम्बेनैव तत्र गत्वा बाणक्षेपः करणीयः।

निषादः—[सहर्षम्] चल रे प्रचल। अवश्यमेव स्वकार्य्यं साधयिष्यामि। [द्रुतं प्रस्थानं करोति]

अनुचरः—[सहर्षम्] जयतु जयतु नाथः। [प्रस्थानं करोति]

[ततः प्रविशति सशिष्यो वाल्मीकिः—स्नानोपकरण-वल्कल-कमण्डलुकरो भरद्वाजो गुरुमनुगच्छति।]

वाल्मीकिः—[स्वगतम्] अहो, मनोहारिणीयं काननशोभा विचित्र-कुसुमसम्भारैर्विलसति। आनन्दः—आनन्दः। सर्वत्रैवानन्दः प्रसरति। [शिष्यं प्रति] वत्स भरद्वाज!

भरद्वाजः—देव!

वाल्मीकिः—तात, आनन्दमयी विश्वप्रकृतिरत्र प्राचुर्य्येणानन्दं वितनोति। पश्य—इयं श्यामलपल्लवा कुसुमभूषणा वनवीथिर्मूर्त्तिमती जननीव स्नेहसुधां वितरति।

भरद्वाजः—आचार्य्यपाद, महता तपसा सञ्जातं भवत आत्मदर्शनम्। तेनानन्दमये ब्रह्मणि प्रतिष्ठितो भवानपारे चिदानन्दसागरे नियतं निमज्जति।

वाल्मीकिः—[भावविह्वलः] आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन। आनन्दः—आनन्दः।

भरद्वाजः—देव, धन्यो भवान् ब्रह्मानन्दलाभेन। धन्याश्च वयं भवतः करुणाप्रसादेन। किन्तु गुरो, दृश्यतामधुना मध्यगगनमवतरति भगवानंशुमाली।

वाल्मीकिः—अहो, पश्यामि तावत्। साधयामि कृत्यम्।

भरद्वाजः—देव, विजयतां भवान्, अधुना कालविलम्बं परिहाय सम्पाद्यताम् आत्मनोऽभिषेकस्तमसानीरेण।

वाल्मीकिः—साधु। तर्हि गृह्यतां मे कमण्डलुः। समापय च प्रागात्मनोऽभिषेकं तमसायाः पुण्यसलिलेन, अहमपि पश्चादागच्छामि।

भरद्वाजः—यद् देवपाद आज्ञापयति। [कमण्डलुं गृहीत्वा स्नानार्थं गच्छति]

वाल्मीकिः—[सानन्दं विचरन् गीतिस्वरेण] अहो, अपूर्वम्!

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च॥

[दूरेऽन्तराले प्रचण्डो बाणक्षेपशब्दो ध्वनति, करुणं रौति विहङ्गी, अन्ये च विहगाः सशब्दमुत्पत्य दूरं गच्छन्ति, श्रूयते च तेषां पक्षसञ्चालनध्वनिः।]

वाल्मीकिः—किमिदम्? कस्तावदयं विहगानां त्रासहेतुः? [सोत्कण्ठो दिशं निरीक्षते।]

दूरान्तराले निषादः—[उच्चैः] अरे अनुचर, पश्य पश्य, कीदृशो मे सफलः प्रयासः।

अन्तराले अनुचरः—प्रभो, निपतितो विहङ्गः। निपतितो विहङ्गः।

अन्तराले निषादः—[सोल्लासम्] आनन्दः आनन्दः। निरूप्यतां क्वासौ खगो बाणविद्धः पततीति।

वाल्मीकिः—[दूरान्निषादवाक्यं श्रुत्वा] अब्रह्मण्यम् अब्रह्मण्यम्। हन्त, कोऽयं दुराचारो निरपराधं विहङ्गं मारयति?

अन्तराले सानुचरो निषाद उल्लासं करोति—हाः हाः हाः

वाल्मीकिः—[उपसृत्य] पापम् पापम्। अहो आनयामि बाणाहत-विहङ्गम्।

[पार्श्वदेशं गत्वा] अहो, एष विचेष्टते बाणाहतो विहङ्गः।

[रक्ताप्लुतं पक्षिणं भूतलादुत्थाप्य अङ्के कृत्वा बहिरानीय भूतले उपविशति—करोति च करेणास्याङ्गमार्जनाम्—बाणोत्पाटनार्थं चेष्टमानः पुनर्विरमति।]

[सोच्छ्वासम्] हा हा, विद्धोऽयं निशितशायकेन। स्नाति च वराको वक्षसि रक्तधारया। तत् कथमिमं बाणमुक्तं करोमि ?

[आहतः क्रौञ्चः करुणक्षीणरावं कृत्वा नीरवो भूतो मृतश्च। अन्तराले च सुकरुणं रौति विहङ्गी।]

वाल्मीकिरुत्थाय—[सविषादम्] हन्त हन्त, पञ्चत्वं प्राप्तो विहङ्गः।

[दीर्घं निःश्वस्य सगद्गदम्] अहो, मुक्तोऽयं भवबन्धनात्। [पुनः सरोषमभिधावन्] अरे रे क्रूराशय, धिक् त्वाम्, धिक् त्वाम्।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

नेपथ्ये सानुचरो निषादः—[आर्त्तकण्ठः] भगवन् भगवन्।

इति दशमोऽङ्कः

एकादशोऽङ्कः

[वाल्मीकेराश्रमः—तपोवने ब्रह्मचारिणः पुष्पादिचयनं कुर्वन्ति]

(प्रविशतः आत्रेयमैत्रेयौ—करयोः शोभेते पुष्पकरण्डके।)

आत्रेयः—सखे मैत्रेय, अत्र कुसुमानि चेष्यामः।

मैत्रेयः—त्वमत्र पुष्पचयनं कुरु यावदहं यज्ञार्थं समिधमाहरामि।

आत्रेयः—भो मा तावद् विलम्बं कुरु। वेला वर्द्धते।

मैत्रेयः—अलं चिन्तया। अचिरादेव प्रत्यागच्छामि।

[प्रस्थानं करोति]

आत्रेयः—साधु। नित्यकृत्येषु कालक्षेपः परिहरणीयः। अतोऽहमपि कुसुमादीनि समाहरामि [पुष्पाहरणं करोति गायति मृदुस्वरेण—"पतितपावन ब्रह्मनारायण सत्य जनार्दन ॐ"]

[प्रविशति दर्भादिसमित्सम्भारमुद्वहन् मैत्रेयः]

मैत्रेयः—आगच्छामि भोः। [आत्रेयस्य पुष्पभाजनमवलोक्य] अहो, पुष्कलं पुष्पपत्रादिकं त्वया समाहृतम्। अहमपि आनयामि होमसमिधम् इमानि च फलानि।

आत्रेयः—[सहर्षम्] साधु। एभिः सकुसुमफलान्वितैर्घृताक्तसमिद्भि-र्वैश्वानरस्तर्पितो भविष्यति।

मैत्रेयः—अन्तर्बहिश्च विलसन् स हि विश्वचैतन्य-विश्वात्मा विश्वमवतु।

आत्रेयः—धन्या भवन्तु विश्वप्राणा विश्वे मर्त्याश्च पूतपापाः।

[दूराद् भरद्वाज आह्वयति]

नेपथ्ये भरद्वाजः—भो भो ब्रह्मचारिणः, एष होमकालः समायातः। तत् त्वर्य्यतामिह सर्वैः।

मैत्रेयः—अये, अत्रभवान् भरद्वाजो यज्ञार्थमाह्वयति।

आत्रेयः—[उच्चैः] एते वयमागच्छामः। [मैत्रेयं प्रति] चल रे प्रचल।

मैत्रेयः—[सहर्षम्] अहो भद्रम्, सर्वं भद्रमस्तु।

[उभौ प्रस्थानं कुरुतः]

[परिवर्तते दृश्यम्—यज्ञवेदिकायां प्रज्वलति सुदीप्तो होमानलः। पुरतः पात्रेषु शोभते हविःकुसुमसमित्सम्भारः। आलिम्पनाद्यलंकृता यज्ञवेदिका नितरां शोभते। ब्रह्मचारिणो मण्डलाकारेणोपविष्टाः।]

भरद्वाजः—[उदात्तस्वरेण] एह्येहीति तमाहुतयः सुवर्चसः
सूर्य्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्यः
एष वः सुकृतो ब्रह्मलोकः ॥

ब्रह्मचारिणः—[युक्तकण्ठेन] अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
हिरण्यवर्णममलं समिद्धं विश्वतोमुखम् ॥
[युक्तकरा वन्दन्ते]

भरद्वाजः—[समिधं गृहीत्वा]—
ओं हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥

ब्रह्मणे स्वाहा [आहुतिं ददाति । अन्ये च सर्वे प्रतिवारं तदनु पठन्ति, ब्रह्मचारिण एवं प्रतिवारं भरद्वाजमनु जुह्वति मन्त्रोच्चारेण]

विष्णवे स्वाहा ।

इन्द्राय स्वाहा ।

रुद्राय स्वाहा । [सर्वे समुत्थाय समस्वरेण पठन्ति वन्दनमन्त्रम्]

तमीश्वराणां परमं महेश्वरम्
तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्
विदाम देवं भुवनेशमीड्यम् ॥

आत्रेयः—[एकाकी]—एष देवो विश्वकर्मा महात्मा
सदा जनानां हृदि सन्निविष्टः ।
हृदा मनीषा मनसाभिक्लृप्तो
य एतद् विदुरमृतास्ते भवन्ति ॥

[प्रविशति वाल्मीकिः सुललितस्वरेणोद्गायन्]

वाल्मीकिः— यो देवोऽग्नौ योऽप्सु
यो विश्वं भुवनमाविवेश।
य ओषधिषु यो वनस्पतिषु
तस्मै ह देवाय नमो नमः॥

भरद्वाजादयः सर्वे—यो देवानां प्रभवश्चोद्भवश्च
विश्वाधिपो रुद्ररूपो महर्षिः।
हिरण्यगर्भं जनयामास पूर्वं
स नो बुद्ध्या शुभया संयुनक्तु॥

[सर्वे प्रणमन्ति]

वाल्मीकिः—ॐ नमस्तेऽस्तु भगवन् विश्वेश्वराय
महादेवाय त्र्यम्बकाय नीलकण्ठाय
मृत्युञ्जयाय नारायणाय।

ॐ विष्णुः। ॐ नारायणः। ॐ रामनारायणः॥ ॐ॥

इति एकादशोऽङ्कः

द्वादशोऽङ्कः

[वाल्मीकेराश्रमाङ्गनम्। ततः प्रविशति विषादखिन्नः शोकमूर्त्तिर्निषादः]

निषादः—अहो ऋषिशापः। स हि अमोघवचनो ब्रह्मर्षिर्दुष्कृतिनं मामभिशपति। तत् कथं मे निस्तारः? [उच्चैर्व्याकुलकण्ठेन] ब्रह्मन्, रक्ष माम्। रक्ष माम्। [प्रस्थानं करोति]

[प्रविशति भरद्वाजेन सनाथो वाल्मीकिः]

वाल्मीकिः—[स्वगतमुद्विग्नकण्ठेन] कोऽयं करुणं विलपति!

[शिष्यं प्रति] तात भरद्वाज, निरूप्यताम् कोऽत्र विलपति आर्त्तकण्ठेन। [स्वगतम्] एतत् करुणमावेदनं श्रुत्वा ममापि हृदयं व्याकुलीभवति।

भरद्वाजः—देव, द्वन्द्वातीतो भवान् इमां दुस्तरां संसारज्वालामतिक्रम्य सच्चिदानन्दमये परब्रह्मणि अनिशं विहरति। तदलं प्राकृतव्यापारेषु भवत उद्वेगेन।

वाल्मीकिः—[स्नेहजडितकण्ठस्वरः] वत्स, प्रशान्ते मे मनसि कोऽपि अव्यक्तः शोकतरङ्गः समुत्थितः। विषादविधुरोऽयं सुकरुणः कण्ठस्वरस्तमेव शोकमुद्दीपयन् सर्वात्मानं मां दुःखसलिले निमज्जयति। नाहमतो निर्वृतिं गच्छामि।

भरद्वाजः—आर्य्यपाद, महता तपसा सञ्जातं भवतो जगन्मयमात्मदर्शनम्। तेन करुणाविगलितं भवदन्तस्तलम् दिव्यामृतधारया आप्लाव्यते। किन्तु देव, आनन्दवार्तां श्रोतुकामोऽस्मि। तदमृतमयं ब्रह्मविज्ञानमुपदिशतु भगवान्।

वाल्मीकिः—अहो, विस्मृतं सर्वम्। तदुपदिशामि श्रीमन्, शृणु—

आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते,
आनन्देन जातानि जीवन्ति,
आनन्दं प्रयान्त्यभिसंविशन्तीति।

एतद्धि ब्रह्मचैतन्यम्। सर्वं ब्रह्ममयम्। ऊर्द्ध्वमधः पुरतः पश्चात् सर्वतः आनन्दः। आनन्दः प्रसरति। आनन्दो विलसति। आनन्दो ब्रह्मेति।

[प्रविशति शोकदीनो निषादः]

निषादः—[महामुनेश्चरणाग्रे पतित्वा] भगवन्, रक्ष माम्। रक्ष माम्।

वाल्मीकिः—[सचकितः] कोऽसि? किमावेदयसि?

निषादः—[युक्तकरः पदप्रान्तोपविष्टः] भगवन्, दीनोऽहं निषादः कुलधर्ममाचरंस्त्वयाभिशप्तः। अतो रक्ष मां करुणामृतेन।

वाल्मीकिः—[स्वगतम्] हन्त प्रमादः! एष स्वभावदीनो लुब्धकः प्रकृतिसिद्धां नैषदवृत्तिमाचरन् मयाभिशप्तः? स हि शोककरो व्यतिकरोऽधुना मामपि दहति। [निषादं प्रति] दीन निषाद!

निषादः—भगवन्, भवानेव शरणमार्त्तजनानाम्। तत् कृपां विधेहि देव, रक्ष मां ब्रह्मशापात्।

वाल्मकिः—[स्वगतम्] नारायणः, नारायणः। [निषादं प्रति] उत्तिष्ठ पुत्रक। गच्छ गृहम्। सर्वं दुःखं तेऽपगच्छतु। [कमण्डलु-जलेनाभिषिञ्चति]

भरद्वाजः—[स्वगतम्] अहो, विजयते महाजनप्रसादः।

निषादः—देव, करुणामय! वन्दे ते चरणकमलम्। प्रणमामि त्वाम्। [अश्रु मार्जयति]

[प्रणम्य प्रस्थानं करोति, मुनिश्चाशिषं करोति]

वाल्मीकिः—रामनारायणः—रामनारायणः।

[भावविह्वलः] एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलं निर्गुणश्च॥

भरद्वाजः—[उपगम्य] आचार्य्यपाद!

वाल्मीकिः—वत्स, प्राकृते दीनजनेऽभिशापमुदीरयन् सत्यधर्माद् विच्युतोऽहम्। तेनाहं सीदामि।

भरद्वाजः—अहो, अपार्थिवं प्रेम। एतद्धि जगन्मङ्गलाय प्रवर्त्तते।

नैपथ्ये भारती—अलं विषादेन महर्षे। निमित्तमात्रमसि, मा त्वमनुशोच।

[वाल्मीकिः पुलकविह्वल ऊर्द्ध्वदेशं निरीक्षते]

वाल्मीकिः—[अशरीरिणीमुद्दिश्य] कासि देवि, अशरीरिणी त्वमन्तरीक्षात् करुणामृतस्निग्धवचसा सान्त्वयसि?

[प्रविशति वीणाकरा ज्योतिर्मयी सरस्वती]

भारती— अलं शोकेन ब्रह्मर्षे मा कुरुष्वानुशोचनम्।
मच्छन्दादेव ते कण्ठान्निर्गतेयं सरस्वती॥

[ततः प्रविशति ब्रह्मणा सार्द्धं देवर्षिनारदः]

ब्रह्मा—[उपसृत्य] जयति देवी सरस्वती। ब्रह्मवादिनि त्वं विजयस्व।

भारती—विजयतां कमलासनः।

नारदः—[प्रणम्य] देवी ब्रह्मभारती प्रसीदतु।

भारती—जयोऽस्तु देवर्षे। आत्मारामस्त्वं रमस्व।

[वाल्मीकिः सरस्वतीं प्रणमति]

वाल्मीकिः—[सरस्वतीं प्रति कृताञ्जलिः] प्रसीद ब्रह्ममयि। ब्रह्मवादिनीं त्वां प्रणमामि।

[सरस्वती वराभयमुद्रां प्रदर्शयति]

नारदः—[वाल्मीकिं प्रति] जयति महर्षिवाल्मीकिः। ब्रह्मन्, एषा वाग्देवी भवन्तं सभाजयितुमाविर्भवति।

भारती—[वाल्मीकिं प्रति] महर्षे, आद्यः कविरसि त्वम्। तद् व्याधजने प्रयुक्तं तेऽभिशापवचनं श्रीरामचन्द्रस्य तथा निखिल-जगतां सन्तापं दूरीकरोतु।

वाल्मीकिः—[कृताञ्जलिः] जयतु जयतु देवी।

ब्रह्मा—[वाल्मीकिमुद्दिश्य] ब्रह्मन्, अनेन निषादप्रसङ्गेन वाग्देवी त्वां रामायणप्रणयने प्रवर्त्तयति। तदनेन देवकार्य्यसाधनेन प्रसादयतु भवान् चिदात्मानं परमानन्देन।

वाल्मीकिः—जय जय भगवन्।

भारती—[वाल्मीकिमुपगम्य] विजयस्व महामुने। आदिकविं त्वामद्य संवर्द्धयामि। तदिमां ते दिव्यवीणामुपहरामि। एतन्माहात्म्येन च सुधामधुरं रामचरितं विरच्य उद्गीयतां जगतां मङ्गलाय।

[वाल्मीकिकरे वीणामुपहरति, वाल्मीकिश्च प्रसन्नो गृह्णाति]

वाल्मीकिः—[उदात्तमधुरस्वरेण गायति] रामनारायणः-रामनारायणः]

ब्रह्म—[उच्चैः सहर्षम्] जयतु कविकुलशिरोमणिर्वाल्मीकिः। विजयतामादिकविर्ब्रह्मवादिन्या वरलाभेन।

नारदः—[वाल्मीकिमुद्दिश्य] ब्रह्मर्षे, एवमादिकविर्भवान् विराजताम् सुचिरं कालं भक्तानां श्रद्धाचन्दनसुरभिणाऽमलयशोमाल्येन। किञ्च, मधु-निस्यन्दिनी भवतो रामायणी कथा पतितपावनी सुरधुनीधारेव जगतां पापराशिं विधूय सर्वेषामानन्दं विदधातु।

[वाल्मीकिः कृताञ्जलिस्तिष्ठति]

ब्रह्मा—अहमपि ततः स्वस्तिवचनमुदीरयामि। [वाल्मीकिं प्रति] ऋषे, जगतः प्रथमकवेर्भवतो जयोऽस्तु। अक्षयश्चास्तु भवतां कीर्त्तिकलापः। अतः कथ्यताम् ,—अधुना किं ते प्रियं करोमि ?

वाल्मीकिः—[प्रसन्नमुखकमलः] भगवन् , अतःपरं किं प्रियमस्ति ? भवतां प्रसादात् सुदुर्लभां दिव्यसम्पदमधिगतोऽस्मि। तथापि चिन्मयं सच्चिदानन्दं हृदये सन्ध्याय प्रार्थये, भारतीप्रसादान्मे विरचितं सुधामयं भुवन-मनोहरं श्रीरामायणं जगतां सन्तापनाशेन निखिलमानन्दं वितनोतु। [प्रणमति]

भारती—साधु साधु। पूर्णोऽस्तु शुभसङ्कल्पः। सफलमस्तु तव साधनम्। [नारदं प्रति दृष्टिक्षेपं विधाय] देवर्षे !

नारदः—विजयतां ब्रह्मवाणी। आदिशतु भगवती।

भारती—महायोगिन् , पूर्णमधुना भवतां मङ्गलव्रतम्। तद् भवतः सुधामयकण्ठोद्गीतेन प्रशस्तिमन्त्रेणादिकविः संवर्द्ध्यताम्।

नारदः—तथास्तु देवि। जगन्मङ्गल-श्रीरामगुणकीर्त्तनेनाहं महर्षिं संवर्द्धयामि।

[नारद गायति]

गानम्

जय सीतापते सुन्दरतनो मानसवनरञ्जन,
नवदूर्वादल श्यामरूप जनगणभयभञ्जन ।
आर्तमानवपरित्राता
त्वं हि मङ्गलसुखदाता
निर्जितारे दुर्जय वीर चित्तकलुषनाशन ।
जयतु मङ्गलरामनाम भुवनमनोहारि
आनन्दघनपुण्यनिर्झर—नन्दनवनचारि,—
वाल्मीकिध्यानश्रुतिसार
नाशितविश्वकलुषहार
परमशरण प्राणरमण राम राजीवलोचन
नमो नमो नमः करुणाघन राघव रघुभूषण ।

द्वादशोऽङ्कः

यवनिकापातः

इति श्रीरामचन्द्रचरणारविन्दमकरन्दमधुप-महामहाध्यापकाशेष शास्त्राचार्य्य-कृष्णकान्तकृतिरत्न-देवशर्मात्मजेन श्रीविश्वेश्वर-विद्याभूषण-काव्यतीर्थेन विरचितं वाल्मीकिसंवर्द्धनं नाम नाटकं परिसमाप्तम् ।

ॐ तत्सत्—ॐ ब्रह्मार्पणमस्तु ।

Some valuable additions in Sanskrit litreature

Elegant Sanskrit plays with beautiful songs by **Pt. Visvesvar Vidyabhushan.** Graced with the good wishes of Rashtrapati Dr. S. Radhakrishnan. Highly praised by MM. Kalipada Tarkācārya, Dr. V. Raghavan, Prof. Srijiv Nyayatirtha, Sri Hiranmay Banerji and other eminent scholars. Successfully staged and broad-cast: —

1. Cāṇakya-Vijayaṃ— Price Rs. 3/- only
2. Vālmīki-Saṃbardhanaṃ— Do.
3. Prabuddha-Himācalaṃ— Do.
4. Uttarakurukṣetraṃ— Do.

Sanskrit Translation of Poet Tagore's celebrated play for the first time by **Prof. Dhyanesh Narayan Chakravorty** of Rabindra Bharati University, Calcutta. Highly praised by Prof. Dr. S. Radhakrishnan, Prof. Dr. Guiseppe Tucci, Prof. Dr. Louis Renou, Professor Dr. Freidrich Heiler, MM. Kalipada Tarkācārya, National Professor Dr. Suniti K. Chatterjee, Dr. Satkari Mukherji, Sj. Hiranmay Banerji, Sj. Saumyendra Nath Tagore, Dr. V. Raghavan and others. Successfully staged and broad-cast: —

1. Mukta dhārā— Price Rs. 5/- only
2. Vārtāgṛhaṃ (Dak-ghar)— Shortly to be out.

(Published in the "Samskṛta Ravindraṃ" by Sahitya Akademi, Govt. of India).

To be had of: —

1. **"RISHI-DHAM"**
   P. O.—Dattapukur, Dt.—24 Parganas,
   West Bengal.
2. **Sanskrit Pustak Bhandar**
   38, Bidhan Sarani, Calcutta-6.